ननु मङ्गलमिदमफलम् समासीतराफलकत्वे सति समाप्त्यफलकत्वात् जलताडनवत् । नचापि(वि)गीतशिष्टाचारविषयत्वेन हेतुना सफलत्वे सिद्धे विश्वजिन्न्यायेन स्वर्ग फल कल्प्यमिति विशेषणासिद्धो हेतुरिति वाच्यम् तथासति स्वर्गकामनाजन्यकृतिविषयत्वापत्त्या समासिकामनाजन्यश्रमरहिताचारविषयत्वापत्ते । तस्मात् न स्वर्ग फल कल्प्यतामिति न विशेषणासिद्धि ।

**End**

तच्च प्रत्यक्ष द्विविधम्— निर्विकल्पक सविकल्पक चेति । तत्र सप्रकारक ज्ञान सविकल्पकम्, निष्प्रकारक तु निर्विकल्पकम् । तत्र विप्रतिपत्ति – ज्ञानत्व सविकल्पकत्वव्याप्य ने(न वे)ति ।

स्मरणरूपविशेषणज्ञान न सम्भवति,

जातिविशेषस्य पूर्वमनुभवादित्यर्थात्तत्र निर्विकल्पकसिद्धिरिति वाच्यम् ॥

**Colophon**

इति मणिदर्पणे स्वप्रकाशवाद ॥

---

### No 4002 तत्त्वचिन्तामणिव्याख्या—दीधिति

TATTVACINTAMANIVYAKHYA DIDHITI

Substance paper Size 9¼ x [illegible] inches Pages 21 Lines, 9 on a page Character Telugu Condition, good Appearance, new

Anumana incomplete

Breaks off in Vyadhikaranadharmavacchinnabhavakhandana

This is a well known commentary by Raghunatha Siromanibhattacharya on the Tattvacintamani of Gangesa

**Beginning**

ओं नमस्सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधिचिन्तामणि कुरुते तार्किकशिरोमणिः श्रीमान् ॥

परजुष्टनयान्निवर्तमाना मनसास्वादितरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां करोतु मोदम् ॥

न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केच(न) विज्ञातुमीशते सुधियः ॥

मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो भूयो विधाय विनयं विनिवेदयामि ।
दृष्य वचो मम परं निपुणं विभाव्य भावावबोधविहितो न दुनोति दोषः ॥

पूर्वापरग्रन्थैरेकवाक्यताप्रतिपत्तये शिष्यावधानाय च सङ्गतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते—प्रत्यक्षेति ।

See under the next number for the end

## No 4003 तत्त्वचिन्तामणिव्याख्या—दीधिति

### TATTVACINTAMANIVYAKHYA DIDHITIH

*Pages 13 Lines, 6 on a page*

Begins on fol 58b of the MS described under No 3986

Complete

Same work as the above

For the beginning, see under the previous number

**End**

ईश्वरबाधे न च विशेष्यमुपाधि , मानव्यापकत्वादिति । साध्य
स्येति(शेष ) । शरीरसहकारेणैव कार्यजनकत्वात् शरीरजन्यस्य न कर्तृ-
जन्यत्वम् । तथा च अकर्तृकत्वरूपसाध्याव्यापकस्य शरीराजन्यत्वस्य
हेतोरव्यापकतया साध्याव्यापक विशेष्यमजन्यत्वं नोपाधिरित्यर्थः ।

---

## No 4004 तत्त्वचिन्तामणिव्याख्या—दीधिति

### TATTVACINTAMANIVYAKHYA DIDHITIH

*Pages 23 Lines, 8 on a page*

Begins on fol 1a of the MS described under No 3992

Incomplete

Same work as the above

---

## No 4005 तत्त्वचिन्तामणिव्याख्या—दीधिति

### TATTVACINTAMANIVYAKHYA DIDHITIH

*Substance* palm leaf *Size* 17 × 1 inches *Pages*, 9 *Lines*, 6 on a page *Character* Telugu *Condition* injured *Appearance*, old

Begins on fol 9a The other works herein are Nañvivecana 1a, Tattvacintamanididhitivyakhya (Bhavanandiya) 11a Paramarsavada 48a

Anumana incomplete

Same work as the above

## No 4006 तत्त्वचिन्तामणिव्याख्या–दीधिति
## TATTVACINTAMANIVYĀKHYA DIDHITIH

Substance, paper Size, 12 × 1½ inches Pages, 12 Lines, 13 on a page Character, Telugu Condition, good Appearance, old

Begins on fol 91a The other works herein are Gadadhariya-vyakhya 1a, Samanyaniruktivadartha 58a Vyutpattivada 84a

Sāmānyanirukti and Siddhantalaksana incomplete in Anumāna-khanda

Same work as the above

---

## No 4007 तत्त्वचिन्तामणिव्याख्या–दीधिति
## TATTVACINTAMANIVYAKHYA DIDHITIH

Pages, 13 Lines, 7 on a page

Begins on fol 5a of the MS described under No 3996

Incomplete

Same work as the above

---

## No 4008 तत्त्वचिन्तामणिव्याख्या–दीधिति
## TATTVACINTAMANIVYAKHYA DIDHITIH

Pages, 25 Lines, 5 on a page

*Begins on fol* 1a of the MS described under No 3989

Vyaptivada incomplete

Same work as the above

## No 4009 तत्त्वचिन्तामणिव्याख्या–दीधिति
## TATTVACINTAMANIVYAKHYĀ DIDHITIH

Substance, palm-leaf Size, 12⅞ × 1¾ inches Pages, 46 Lines, 6 on a page Character Telugu Condition, slightly injured Appearance, old

Begins on fol 107a The other work herein is Tattvacinta-manididhitivyākhya (Bhavanandiya) 1a

Anumanakhanda incomplete

Same work as the above

## No 4010 तत्त्वचिन्तामणिव्याख्या–दीधिति

### TATTVACINTAMANIVYAKHYA DIDHITIH

Substance palm-leaf. Size, 1½ × 1½ inches Pages 5 Lines 6 on a page Character Grantha Condition injured Appearance, old

Begins on fol 1a The other works herein are Tattvacintamanididhitiprakasika 4a, Savyabhicarasamanyaniruktitippana 85a

Savyabhicara complete

Same work as the above

## No 4011 तत्त्वचिन्तामणिव्याख्या–दीधिति

### TATTVACINTAMANIVYAKHYA DIDHITIH

Pages 12 Lines 11 on a page

Begins on fol 5a of the MS described under No 3985

Incomplete

Same work as the above

## No 4012 तत्त्वचिन्तामणिव्याख्या–दीधिति

### TATTVACINTAMANIVYAKHYA DIDHITIH

Pages, 108 Lines 12 on a page

Begins on fol 1a of the MS described under No 3994

Anumanakhanda incomplete

Same work as the above

## No 4013 तत्त्वचिन्तामणिप्रकाश

### TATTVACINTAMANIPRAKASAH

Substance, palm leaf Size 17 × 1½ inches Pages 295 Lines, 7 on a page Character Grantha Condition, injured Appearance, new

Pratyaksa-pariccheda complete

A commentary on the Tattvacintamani of Gangeśa by Rucidatta

**Beginning**

कृष्णोत्तरच्छदपटार्धकृतान्तरालमुक्ताळनिश्वसितनुन्नपयोधराग्रम् ।
ईशे स्फुटागसि विभिन्नतनोस्तनोतु सुप्त रुषा शयनसीम्नि शिव शिवाया ॥
अधीत्य रुचिदत्तेन जयदेवाज्जगद्गुरो ।
चिन्तामणौ ग्रन्थमणौ प्रकाशोऽय प्रकाश्यते ॥

प्रारिप्सितविघ्नविघाताय कृत नमस्कार शिष्यशिक्षायै ग्रन्थो(न्थ)तो निबध्नाति—गुणातीत इति । सत्त्वरजस्तमोगुणातीत इत्यर्थ । अपिशब्दो विरोधाय । ईशोऽप्रतिहतेच्छ इच्छाया गुणत्वमादाय विरोध भानम्

स्वकृतमङ्गळस्य व्यभिचारेण वैफल्य मा भूदिति उपोद्घातसङ्गत्या तस्य समाप्तिहेतुत्व व्यवस्थापयितु भूमिकामारचयति—इहेति । प्रसङ्ग एवात्र सङ्गतिरित्यन्ये । इह जगति । खलुशब्दो वाक्यालङ्कारे

**End**

नन्वेव पदार्थस्मृतेरपि यथार्थत्वाभावे तन्मूलक ज्ञानमयथार्थ स्यादित्यत आह प्रमृषे(ष्टे)ति । पदात्पदार्थस्मरण प्रमृष्टतत्ताकमेवेति तन्नायथार्थ्य(र्थ्य)मित्यर्थ । तत्तोल्लेखिस्मरणाभिप्रायेणाह—तदाहुरिति ॥

**Colophon**

इति श्रीमहोपाध्यायरुचिदत्तविरचिते श्रीतत्त्वचिन्तामणिप्रकाशे प्रत्यक्षपरिच्छेदस्समाप्त ॥

---

## No 4014 तत्त्वचिन्तामणिप्रकाश·

### TATTVACINTAMANIPRAKAŚAH

Substance, palm-leaf Size, 17⅜ × 1¼ & 10⅝ × 1⅞ inches Pages, 282 Lines, 8 on a page Character Grantha Condition, fair Appearance, old

Folios 22 to 29 are lost

Anumanakhanda and Upamanakhanda complete
Same work as the above

**Beginning**

प्रणयकलहकाले निर्घृण भीतिहेतो प्रकटयति समन्तान्मायया कायमस्मिन् ।
सभयमथ भवान्या गाढमालिङ्ग्यमानो घटयतु घनविघ्नध्वसमस्माकमीश ॥

निशम्य सकल शास्त्र नानागुरुमुखाम्बुजात् ।
अनुमानप्रकाशोऽय रुचिदत्तेन तन्यते ॥

अत्र सङ्गति दर्शयन्नेव शिष्यावधानार्थमिदानीमनुमान निरूप्यत इति प्रतिजानीते—प्रत्यक्षेन । प्रत्यक्षस्यानुमान प्रति साक्षात्परम्परया वा हेतुत्वमुपजीव्यत्वम् ।

* * *

तथा च उक्तश्रुतिरप्यनन्यथासिद्धा तत्र प्रमाणमेवेति तात्पर्यम् । अत एव शास्त्रम त्वज्ञानपूर्वकमप्युपपद्यते । तद ग्रिमक्षण एव मोक्षोत्पत्तौ तदसम्भवादिति ॥

**Colophon**

इति महोपाध्यायरुचिदत्तविरचितोऽनुमानप्रकाश परिपूर्ण ॥

शिष्यावधानाय प्रतिजानीते—अथेति । अनुमाननिरूपणानन्तर मित्यर्थ । तदानन्तर्यसङ्गति प्रागुक्तैव । शब्दशक्तिग्राहकतया उपमान मात्रस्य शब्दोपजीव्यतया तत प्राथम्यम् ।

**End**

एवञ्च गोसादृश्यसामानाधिकरण्येन तत्परिच्छेदे वैसादृश्याभावस्य तद्भिन्नस्य वाक्यार्थतया तत्राव्याप्तिः स्त मिति निरस्तमिति बोध्यम् ॥

**Colophon**

इति महोपाध्यायरुचिदत्तविरचिते तत्त्वचिन्तामणिप्रकाशे उपमान खण्ड समाप्त ॥

## No 4015 तत्त्वचिन्तामणिप्रकाश

TATTVACINTĀMANIPRAKASAH

Substance paper Size 13½ × 8½ inches Pages, 326 Lines 20 on a page Character Grantha Condition, good Appearance new

Pratyaksapariccheda complete

Same work as the above

## No 4016 तत्त्वचिन्तामणिप्रकाश

TATTVACINTĀMANIPRAKASAH

Substance palm leaf Size, 19 × 1⅛ inches Pages, 293 Lines, 8 on a page Character Grantha Condition fair Appearance new

Anumanakhanda incomplete

Same work as the above

## No 4017 तत्त्वचिन्तामणिप्रकाश

TATTVACINTĀMANIPRAKASAH

Substance, palm leaf Size 17 × 1⅛ inches Pages 280 Lines on a page Character Telugu Condition much injured Appearance old

Anumanakhanda incomplete

Same work as the above

## No 4018 तत्त्वचिन्तामणिप्रकाश

TATTVACINTĀMANIPRAKASAH

Substance, palm leaf Size 18 × 1½ inches Pages, 66 Lines, 8 on a page Character Telugu Condition, injured Appearance, old

Anumanakhanda incomplete

Same work as the above

## No 4019 तत्त्वचिन्तामणिव्याख्या–फक्किका

### TATTVACINTAMANIVYAKHYA PHAKKIKA

**Pages**, 32 Lines, 10 on a page

Begins on fol 37b of the MS described under No 3925

Anumana to the end of Pramanyavadarahasya

A commentary on the Tattvacintamani of Gangesa by Madhuranatha

See under the next number for the end

**Beginning**

न्यायाम्बुधिकृतसेतु हेतु श्रीराममखिलसम्पत्ते ।
तात त्रिभुवनगीत तर्कालङ्कारमादरान्नत्वा ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दर्श्यन्ते द्वितीयमणिफक्किका ॥
आन्वीक्षिकीपण्डितमण्डलेषु सनाण्डवैरध्ययन विनापि ।
मदुक्तमेतत्परिचिन्त्य धीरा निश्शङ्कमध्यापनमातनुध्वम् ॥

* * * *

प्रत्यक्ष निरूपितमिदानीमनुमान निरूपणीयमत शिष्यावधानाय प्रतिजानीते—प्रत्यक्षानन्तरमित्यादिना । अन्यथा अरण्यरुदित स्यादिति भाव । प्रत्यक्षानन्तर प्रत्यक्षनिरूपणानन्तरम् । उपमानात्प्राक उपमान निरूपणात्प्राक् । अनुमान निरूप्यत इत्यन्वय ।

---

## No 4020 तत्त्वचिन्तामणिव्याख्या–फक्किका

### TATTVACINTAMANIVYAKHYA PHAKKIKA

Substance, paper Size, 10 x [illegible] inches Pages 250 Lines, 15 on a page Character [illegible] Condition good Appearance, new

From Samanyalaksana to Badha in Anumanakhanda

Same work as the above

See under the previous number for the beginning

**End**

यद्यपि वह्विरनुष्ण कृतकत्वादित्यादिक सर्वमेव धर्मिग्राहक मानबाधित वत्पदानुश्य(ह्याचादावुष्ण)त्वादिग्राहकमानस्यापि वह्न्यादिरूप-धर्मिग्राहकत्वात् । न च धर्मिग्राहक धर्मितावच्छेदकविशिष्टधर्मिमात्र-ग्राहकमिति वाच्यम्, द्वयोर्व्यापक इत्यादेरपि अतथात्वात् । तथा प्युद्भावने कथक(प्रति) सम्प्रदायसिद्धप्रकारबोधोऽनेन दर्शित इति न काप्यनुपपत्तिरिति सङ्क्षेप ॥

इति हेत्वाभासरहस्यम् ॥

**Colophon**

मधुरानाथतर्कवागीशविरचिता अनुमानचिन्तामणिटीका सामाप्ता ॥

---

## No 4021 तत्त्वचिन्तामणिव्याख्या—फक्किका

## TATTVACINTAMANIVYAKHYA PHAKKIKA

Substance, palm leaf Size 14 × 1[illegible] inches Pages 87 Lines 10 on a page Character Grantha Condition good Appearance old

Begins on fol [illegible] The other work herein is [illegible] Anumanakhanda incomplete

Copying was completed on the 30th of Arppisi in the year Virodhikrt by Madabhusi Venkataraghavasuri

Same work as the above

---

## No 4022 तत्त्वचिन्तामणिव्याख्या—फक्किका

## TATTVACINTAMANIVYAKHYA PHAKKIKA

Substance, palm leaf Size, 1[illegible] × 1¼ inches Pages, 260 Lines, 10 on a page Character Telugu Condition, good Appearance, old

The first four leaves are lost

By Madhuranatha

From the beginning to Misralaksana

Same work as the above

---

## No 4023 तत्त्वचिन्तामणिव्याख्या—फक्किका

### TATTVACINTAMANIVYAKHYA PHAKKIKA

Substance, paper Size 16¹ × 3³ inches Pages 300 Lines, 8 on a page Character Bengali Condition good Appearance old

The leaves are not in proper order

Incomplete

Same work as the above

---

## No 4024 तत्त्वचिन्तामणिव्याख्या—फक्किका

### TATTVACINTAMANIVYAKHYA PHAKKIKA

Pages 26 Lines, 7 on a page

Begins on fol 72a of the MS described under No 914

Anumanakhanda incomplete

Same work as the above

---

## No 4025 तत्त्वचिन्तामणिव्याख्या—फक्किका

### TATTVACINTAMANIVYAKHYA PHAKKIKA

Pages 20 Lines 6 on a page

Begins on fol 1a of the MS described under No 3992

Anumanakhanda incomplete

Same work as the above

## No. 4026 तत्त्वचिन्तामणिव्याख्या—फक्किका

### TATTVACINTĀMAṆIVYĀKHYĀ PHAKKIKĀ

Substance, paper Size, 12½ × 4 inches Pages, 180 Lines, 14 on a page Character, Telugu Condition, good Appearance, new

Anumānakhaṇḍa up to Kēvalānvayavyatirēka

Same work as the above

---

## No. 4027 तत्त्वचिन्तामणिव्याख्या—फक्किका

### TATTVACINTĀMAṆIVYĀKHYĀ PHAKKIKĀ

Substance, palm leaf Size, 15 × 1½ inches Pages, 310 Lines, 7 on a page Character, Telugu Condition, injured Appearance, old

Śabdakhaṇḍa incomplete

This is a commentary on the Tattvacintāmaṇi of Gaṅgēśa by Mathurānātha

This manuscript was copied by Anantarāya of Lingapālayam for Vedamūrtibhāskaraśāstrin on the second day of the bright half of the Āṣāḍha month in the year Tāraṇa

**Beginning**

न्यायाम्बुधिकृतसेतु हेतु श्रीराममखिलसम्पत्ते ।
तात त्रिभुवनगीत तर्कालङ्कारमादरान्नत्वा ॥

श्रीमता मथुरानाथतर्कवागीशधीमता ।
विशदीकृत्य लिख्यन्ते तृती(तुरी)यमणिफक्किका ॥

प्रत्यक्षादिप्रमाणत्रय निरूपितम् । इदानीं चरमप्रमाण शब्दो निरूपणीय । तत शिष्यावधानाय प्रतिजानीते—अथेत्यादिना । अथ उपमाननिरूपणानन्तरक्षणनिष्ठ शब्द शब्दप्रमितिकरणम् । यथाश्रुते अग्रे प्रमाणशब्दलक्षणस्यार्थान्तरापत्ते । निरूप्यत इति निरूपण लक्षणस्व-

रूपप्रामाण्यादिभिर्ज्ञापनम् । लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलव्या-
पार इति यावत् । आख्यातस्य विषयत्वमर्थ । तथा च उपमान
विशेष्यकलक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलव्यापारानन्तरक्षणनिष्ठा
भिन्नो यो लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलव्यापार तद्विषय
प्रमाणशब्द इत्यर्थ ॥

See under the next number for the end

---

No 4028 तत्त्वचिन्तामणिव्याख्या—फक्किका

TATTVACINTAMANIVYAKHYA PHAKKIKA

Substance palm leaf Size, 19¾ × 1⅝ inches Pages, 126 Lines, 9 on a page Character Telugu Condition fair Appearance, old

Utsannapracchannavada in Sabdakhanda is complete

Same work as the above

See under the previous number for the beginning

**End**

द्रव्य हि द्विधा—सावयव निरवयवम् । तत्राद्यमुत्पत्तिकालावच्छे-
देन निखिलसमवेतकार्यशून्यमित्यविवादम । अन्त्यमपि महाप्रलयावच्छे-
देन निखिलकार्यशून्यमित्यत्रापि भेदतो न विप्रतिपत्तिरित्यस्वरसादाह—
आगमोऽपीति । सवदति प्रमापयति तस्मिन्नर्थे प्रमाणमिति यावत् ।
श्रूयते हि—सदेव सौम्येदमग्र आसीत् । एकमेवाद्वितीयमिति ।
तेन प्राङ्नित्य द्रव्यमेवासीत् न कार्यद्रव्यमित्यागतम् । प्राग-
भावाधिकरणकार्यद्रव्यशून्यकाल सिध्यति । एव नाहो (न) रात्रिरित्याद्या-
गमोऽप्यनुसन्धेय ॥

**Colophon**

इति शब्दखण्डरहस्ये उत्सन्नप्रच्छन्नवादरहस्यम् ॥

No 4029 तत्त्वचिन्तामणिव्याख्या—मयूख

TATTVACINTAMANIVYAKHYA MAYŪKHAH

Substance, paper Size, 10½ × 4½ inches Pages, 136 Lines, 20 on a page Character, Telugu Condition, good Appearance, new

Anumāna complete

A commentary on the Tattvacintamani of Gangēsōpadhyaya by Jagadisa

**Beginning**

सस्मिताननसराजमङ्कण सञ्चरच्चलितचूर्णकुन्तलम् ।
रोचनोल्लसितफालमस्तु मे कैशव मनसि शैशव वपु ॥

श्रीसार्वभौमस्य गुरो पदाब्ज विद्यार्थिना कल्पतरो प्रणम्य ।
मणेर्मयूखोऽयमतिप्रयत्नाद्विनिर्मितो विज्ञमुद तनोतु ॥

प्राच्यैरनुचितविविधक्षोदै कलुषीकृतोऽप्यधुना ।
मणिरयमनुपमसरणि श्रीजगदीशप्रकाशित स्फुरति ॥

सङ्गतमेवानन्तर निरूप्य नासङ्गतमिति शिष्यशिक्षार्थमनुमाने प्रत्यक्षस्योपजीवकत्वरूपसङ्गतिं प्रदर्शयन्नेवानुमान तदनन्तर निरूप्यत्वेन निर्दिशति—प्रत्यक्षोपजीवकत्वादित्यादिना ।

प्रत्यक्षानन्तर प्रत्यक्षनिरूपणानन्तरम् । तत्र च प्रत्यक्षप्रमाणस्य निरूपणोत्तर तत्फल इव प्रत्यक्षप्रमाया निरूपणोत्तर तत्फलेऽपि शिष्याणा प्रश्नसम्भवादनुमितितत्करणयोर्द्वयोरेव यथाक्रम प्रत्यक्षधीतत्करणानन्तरनिरूप्यत्वेन प्रतिज्ञेयत्वम् ।

**End**

आगमेनेति । स्वाराज्यकामो राजन्यो राजसूयेन यजेतेत्यागमेन स्वर्गसाधनताग्राहकेन(ण) राजसूययागस्य क्षत्रियकर्तव्य(त्व)प्रमितेरिति भाव ॥

द्वितीयचिन्तामणिसूक्तिरत्र प्रकाशिता श्रीजगदीशशर्मणा ।
तमेव धीरा परिश(शी)लयन्तु चिन्तामणेर्ज्ञानमभीप्सवो यदि ॥

**Colophon**

इति महामहोपाध्यायश्रीमज्जगदीशतर्कालङ्कारभट्टाचार्यविरचिते अनुमानमयूखे हेत्वाभासप्रसर ॥

---

## No 4030 तत्त्वचिन्तामणिसार

### TATTVACINTAMANISARAH

Substance, palm-leaf Size, 18⅝ × 1⅞ inches Pages, 372 Lines, 11 on a page Character, Grantha Condition injured Appearance old

From Pratyaksa to Upamana

This gives a brief summary of Tattvacintamani and Ālōka, etc

By Gōpinatha

For the end, see under the next number

**Beginning**

कालिन्दी कठिना सरित्तरिरिय जीर्णा भवानकमो
नो जानामि तरीतुमस्मि वनिता यास्यामि पार कुत ।
इत्युक्त्वा विमुखीमिव स्मितमुखी धृत्वाञ्चले चञ्चले
नाव प्रापयते शनैर्विहसते कृष्णाय तुभ्य नम ॥
निर्गलित मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसार गोपीनाथस्ततस्तनुते ॥

तत्र सर्वशिष्टपरिगृहीतमसन्दिग्धफल मङ्गलमादौ निरूप्यते । अलौकिकाविगीतशिष्टाचारानुमितेन समाप्तिकामो मङ्गलमाचरेदिति विधिना मङ्गल समाप्तिफलक समाप्तीतराफलकत्वे सति सफलत्वात्—इत्यनुमानेन च मङ्गलस्य समाप्तिहेतुताबोधनात् ।

* * * *

अत एव तत्त्वज्ञानसाफल्यम् । तत्त्वज्ञाननिदाघनिष्पीतसलिलाया-मूषरायामिति । तस्मात्तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ भोगेन पूर्वकर्मणां क्षय इति भवति दुःखप्रागभावासहवृत्तिदुःखध्वंसलक्षणो मोक्ष इति दिक् ॥

वत्वा गोपीनाथ पयोनिधे कन्यकानाथम् ।
अनुमानलक्षणविधि सपरीक्षणमातनोति स्म ॥

**Colophon**

इति मिथिलादेशवासिघोसौतकुलसम्भूतमहोपाध्यायमिश्रभवनाथठक्कुरसुतमहोपाध्यायमिश्रश्रीगोपीनाथठक्कुरकृतानुकृतानुमानसार सम्पूर्ण ॥

* * *

अनुमानान्तर्भावानन्तर्भावस्योपमाने निरूपणीयस्य अनुमाननिरूपण सापेक्षतया अनुमान निरूप्य शक्तिग्राहकतया उपमानत्वावच्छिन्नस्योप जीव्यतया शब्दनिरूपणात्पूर्वमेव उपमान निरूप्यते । तत्रोपमितिकरण-मुपमानम् । उपमितिश्च अतिदेशवाक्यार्थविशिष्ट पिण्डज्ञानजन्यज्ञा-नम्

---

No 4031 तत्त्वचिन्तामणिसार

*TATTVACINTAMANISARAH*

Substance, palm leaf Size 18½ × 1¼ inches Pages, 92 Lines 8 on a page Character Grantha Condition, injured Appearance, old

Wants beginning in the Śabdakhanda

Same work as the above

For the beginning see under the previous number

**End**

ननु तथापि न चतुष्ट्य प्रमाणस्य, सम्भवैतिह्ययो प्रमाणान्तरत्वादिति चेन्न । सम्भवति सहस्रे शतमित्यादेरनुमानान्तर्भावे(वादे)

तिम्रस्य शब्द एवान्तर्भावादर्थापत्तेर्व्यतिरेक्यनुमानरूपत्वस्यानुपलब्धे प्रत्य-
क्षसहकारित्वस्य वानुमानमणिसारेऽनुमानाल्लो(लो)कभूषणे प्रतिपादितत्वा
दिति दिक् ॥

(स)हृदयेषु बुधेषु नतो मुहु किमपि गोचरयामि कृताञ्जलि ।
मम वच प्रचये करुणामयीं कुरुत दृष्टिमतोऽस्त्वयमर्थवान् ॥ इति ॥

**Colophon**

शब्दखण्डमणिसार समाप्त ॥

---

No **4032** तत्त्वचिन्तामणिसार

TATTVACINTAMANISARAH

Substance palm-leaf Size $14\frac{1}{4} \times 1\frac{1}{8}$ inches Pages, 52 Lines, 7 on a page Character Telugu Condition much injured Appearance, old

Begins on fol 1*a* The other works herein are Adityahrdaya *27a*, Indrakṣīstotra, etc, *28a*

Without beginning and end

Vidhivada

Same work as the above

**Beginning**

घटप्रागभाव कार्यद्रव्यानाधाराधार कार्योद्रव्यानधिकरणकार्यानधि
करणवृत्तिर्वा अभावत्वात् आकाशवृत्त्यन्योन्याभाववदिति वृत्तिप्रलयसाध-
नात् । एवमेव प्रलयसाधनात् । यद्वा
घट कार्याधिकरणकार्यद्रव्यानधिकरणवृत्तिध्वसप्रतियोगी कार्यत्वात् श-
ब्दवत् । आचार-
मू(ल)त्व वेदस्य प्रवर्तकज्ञानजनकत्वेन भवति । प्रवर्तक ज्ञान निरू-
प्यते—तत्राभिवासङ्कल्पापूर्वभावनाज्ञान न प्रवर्तकम्, तस्मिंश्च सति(कृ-
त्यसाध्ये अ)प्रवृत्ते, असत्यपि (कृतिसाध्ये) प्रवृत्तेश्च कार्यत्वज्ञान प्रवर्त-
कम्—इति गुरव ।

**End**

अपूर्ववाच्यत्वेऽप्यपूर्वस्य स्वर्गसाधनतासशयात् योग्यतासशय एव प्रथममपूर्वस्य स्वर्गसाधनताया अनिश्चयात् अपादानस्यान्विताभि धानोऽत्र माणाभावेन द्वारसभावनाया अर्थसा- धनसम्भावनात स्वर्गकामान्वय इति तुल्यम् । अपि च यथा क्रिया स्थिरेत्ययोग्या तथा कार्यमपूर्वव नष्टत्वात् । न चाधिष्ठाने अपूर्वमात्रे साधनत्वम्

---

## No 4033 तत्त्वचिन्तामणिसार

## TATTVACINTĀMANISARAH

Substance palm leaf Size $14\frac{3}{4} \times 1\frac{1}{4}$ inches Pages 20 Lines, 9 on a page Character, Grantha Condition injured Appearance old

Begins on fol *1a* The other works herein are Tarkasuddhi *11a*, Tarkabhāṣāvyākhyā 4[illegible]

Śabdakhanda incomplete

Same work as the above

**Beginning**

निर्गलित मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसार गोपीनाथस्ततस्तनुते ॥

उपमानशब्दयोरुपजीव्योपजीवकभावाविशेषेऽपि उपमानत्वादेरुपजी- व्यत्व प्रक्रम्य प्राथमिकशिष्याजिज्ञासया उपमान निरूप्य शब्दो निरू- प्यते । तत्र प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्य शब्द प्रमाणमिति मणि कृत ।

**End**

शब्दज्ञानस्यापि तज्जन्यत्वमेव, तत्कार्यतावच्छेदकालिङ्गितत्वात् । ततो न शब्दस्थले पृथक्कल्पना, येन योग्यताज्ञान हेतु स्यादित्यल- मतिविस्तरेण ॥

## No 4034 तत्त्वचिन्तामणिसार

### TATTVACINTĀMAṆISĀRAH

Substance, palm leaf Size, 16 × 1¼ inches Pages, 212 Lines, 6 on a page Character, Grantha Condition, slightly injured Appearance, old

Anumana section to the end of Paksata

In the preface he refers to Mani (i e, Tattvacintamani) and Āloka (a commentary on the Mani by Jayadeva, nephew of Hari-Diksita)

Same work as the above

---

## No 4035 तत्त्वचिन्तामणिसार

### TATTVACINTĀMAṆISĀRAH

Substance palm-leaf Size, 14¾ × 1¼ inches Pages, 267 Lines, 5 on a page Character Telugu Condition much injured Appearance old

Incomplete

Same work as the above

---

## No 4036 तत्त्वचिन्तामणिसार

### TATTVACINTAMAṆISARAH

Substance, palm leaf Size, 16¼ × 1½ inches Pages, 46 Lines, 8 on a page Character Telugu Condition, much injured Appearance, old

Incomplete

Same work as the above

**Beginning**

यस्य द्विरद . . तमाश्रये ॥

इह तावदभीष्टकर्मणा निर्विघ्नपरिसमाप्तिमुद्दिश्य बहुश प्रवर्तमाना-नि(वि)नाय(क)दधिदूर्वादौ मङ्गले दृश्यन्ते । . तत्र मङ्ग

लस्य तद्विशेषस्य वा नमस्कारस्य प्रतिबन्धकदुरितायुत्सारणद्वारा अभीष्टपरिसमाप्तिं प्रति कथ न मुपायत्व माह्यम्? श्रुतेरिति चेन्न, तथाविधश्रुतेरनाकलनात्, शिष्टाचाराचदनुमानमिति चेत्, शिष्टाचारस्यानिर्वचनात्। तथाहि -किं शिष्टाचारत्व वेद(प्रा)माण्याभ्युपगन्तृपुरुषोत्पाद्य मानत्व वा

**End**

ननु धेन्वादिपदेऽप्येव स्यात् न स्यात् सामजानुशब्दानामावापोद्वा(प)प्रक्रमेण शक्ते कल्पनात्। यत्र योगार्थान्विनरूढ्यर्थावबोधस्तत्र सर्वत्र

---

No 4037 तत्त्वचिन्तामणिसारखण्डनम्

TATTVACINTAMANISARAKHANDANAM

Substance, palm leaf Size 18¾ × 1¾ inches Pages 264 Lines, 8 on a page Character Grantha Condition injured Appearance old

Pratyaksakhanda complete

By Vēdanta Srinivasacarya

In this treatise the author criticises unfavourably the views given in Tattvacintāmanisara

**Beginning**

पद्मा पद्मासनासीना पद्महस्ता दयामयीम्।
पद्मनाभप्रिया वन्दे पद्मासनमुखैर्नुताम्॥
श्रीमत्सङ्करपुङ्गवार्यतनयाच्छ्रीश्रीनिवासाद्गुरो
उद्भूताद्गुणशेवधेरुदभवच्छ्रीवेङ्कटाचार्यत।
आत्रेयान्वयसिन्धुकौस्तुभमणेरेषश्रीनिवासस्सुधी
गोपीनाथकृतिष्वसौ वितरति व्याघातपारम्परीम्॥
विविधानि विचित्राणि दूषणानि ददाम्यहम्।
मणिकारादिसिद्धान्ते कथाकौतुकिना मुदे॥

असूयामत्सरग्रस्ता काम सन्तु सहस्रश ।
सन्तस्सन्त्येव भुवने गुणश्लाघागुणोज्ज्वला ॥

प्रामाण्य स्वत एव गृह्यत इति वयम्, परत इति नैयायिका । तत्र विप्रतिपत्ति — प्रामाण्य प्रामाण्यग्राहिका या सामग्री तदन्ययावज्ज्ञान-ग्राहकग्राह्य न वेति । एवमस्मन्मते विशिष्यापि विप्रतिपत्ति — घट इति ज्ञानप्रामाण्य स्वाश्रयग्राहकग्राह्य न वेति । न चात्र यावत्पदस्य सिद्धसाधनवारकतया तद्दोषास(म्भ)वेऽपि सर्वप्रकारकत्वे सति सर्वविशे ष्यकत्वरूपप्रामाण्ये सिद्धसाधन सर्वविषयकज्ञानवृत्तितया ज्ञानस्य स्वाश्रय-ग्राह्यत्वादिति वाच्यम् ।

**End.**

अन्यत्र विशेषणज्ञानस्य हेतुत्वे प्रमाणाभावाच्च यद्विशेषयोरिति न्यायस्य पूर्वमेव दूषितत्वात । अन्यथा निर्वि-कल्पकवाद ॥

**Colophon**

इति वेदान्ताचार्यश्रीनिवासदासस्य कृतिषु मणिसारखण्डने प्रत्यक्ष-खण्ड ॥

अत्रिवंशभववेङ्कटार्यनश्रीनिवासविदुषा विनिर्मितम् ।
पूर्णमेतदपरोक्षगोचर सन्मुदेऽस्तु मणिसारखण्डनम् ॥

---

No 4038 तत्त्वचिन्तामणिदीधितिव्याख्या

TATTVACINTAMANIDIDHITIVYĀKHYA

Substance palm-leaf Size, 14⅜ × 1⅝ inches Pages 209 Lines, 6 on a page Character, Telugu Condition, injured Appearance, old

Contains Anumitivada, Vyaptivada, Upadhivada, Paksatavada, Lingakaranatavada and Vyatirēkavada

A commentary on the Didhiti of Raghunātha-Śirōmaṇi
Author unknown
Incomplete

**Beginning**

महेश त्रिपुरा लक्ष्मीं नरसिंह गणेश्वरम् ।
सरस्वतीं प्रणम्याथ लिख्यते विदुषा मुदे ॥

वक्षोजकुम्भयुगनम्रशरीरवल्लीं ब्रह्मादिमौलिमणिराञ्जितपादपद्माम् ।
वक्त्रप्रभालवविनिर्जितपूर्णचन्द्रा वन्दे गिरीन्द्रतनया जगदेकरम्याम् ॥

उद्देशात्सङ्गतिकथनम्, तल्लक्षणस्यावधित्वमर्थात् लक्षणनिरूपण सङ्गतिलक्षणपर्यालोचनेन तस्यावश्यकत्व दर्शयितु तल्लक्षणमाह—पूर्वापरेति । अर्थैकत्वादेक वाक्य साकाङ्क्षं चेद्विभागे स्यादिति जैमिनिसूत्रम् ।

**End**

मूले द्रव्याण्येत्युपलक्षणम् । अष्टद्रव्यस्यापि मात्रे तात्पर्यम् । तद्रूपावच्छिन्नाभाव अपोह्यते । यद्यपि प्रकारभेदमादाय उक्तविशेषणान्युद्धर्तुं शक्यन्ते, अन्योन्यात्यन्ताभावव्यवहारेऽपि प्रकारभेदेनैव स्यात् । प्रतियोग्यभेदाच्च नाभावभेद ।

* * * *

**Colophon**

केवलव्यतिरेकिवादस्समाप्त ॥

---

No **4039** तत्त्वचिन्तामणिदीधितिपरीक्षा

TATTVACINTĀMAṆIDĪDHITIPARĪKṢĀ

Substance, palm leaf Size, 18 × 1½ inches Pages 244 Lines 6 on a page Character, Telugu Condition, good Appearance, new

Anumana complete

A gloss on the Didhiti of Raghunatha-Śirōmani by Rudra-nyayavacaspati, son of Gaudadesavidyanivasabhatta

**Beginning**

अथ हेत्वाभासनिरूपणम्—

परिकरो व्याप्तिपक्षधर्मते, एतावतावसरस्सूचित । सङ्गत्यन्तरमाह— तत्प्रसङ्गादिति । हेतुप्रसङ्गादित्यर्थ । सद्धेतुना विरोधितया हेत्वाभास स्मारित, उपेक्षानर्हत्व चाभासज्ञान एव । परहेतोराभासत्वोद्भावनेन विजयादन्या सङ्गतिमाह—तत्त्वनिर्णयेति । आदिपदाद्विजयपरिग्रह ।

**End**

यद्वा कर्तृजन्यत्वावच्छिन्ने शरीरित्वेन कारणत्वे चात्रानुकूलतर्क कर्तुरित्यादिना दर्शित, एवञ्च शरीराजन्यत्वे(सति) कर्तृजन्यत्व भवेदिति हेतोस्साध्यव्याप्यमिति पाठान्तरमप्रामाणिकम् ॥

विशारदतनूजन्यविद्यावाचस्पतेस्सुना(ता)त ।
विद्यानिवासाज्जातस्य रुद्रस्येय विनिर्मिति ॥

**Colophon**

इति श्रीमहोपाध्यायगौडदेशविद्यानिवासभट्टात्मजश्रीरुद्रन्यायवाचस्पतिविरचितानुमानदीधितिपरीक्षा समाप्ता ॥

---

## No 4040 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTĀMANIDIDHITIPRAKĀSIKA

Substance, palm-leaf Size 19¾ × 1½ inches Pages 221 Lines, 10 on a page Character Grantha Condition injured Appearance new

An exhaustive commentary on the Didhiti of Raghunatha Śirōmani

By Gadadharabhattacarya Pramanyavada complete in the Pratyaksakhanda

**Beginning**

नत्वा नन्दतनूजसुन्दरपद स्मृत्वा गुरोरादरा-
दुर्वीमण्डलमण्डनायितयशोराशेरशेषा गिर ।
सद्विसोक्त्यतिदक्षदीधितिकृत प्रत्यक्षचिन्तामणि-
व्याख्या व्याकुरुते गदाधरसुधीर्मोदाय विद्यावताम् ॥

गुरुकीर्तनरूपमङ्गल कुर्वाण एव स्वीयग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थ तदुत्कर्ष दर्शयति—गिरमित्यादिना । हृदये मानसे निधान सम्बन्धसम्पादनम् । मनसि गुरुगिरा सबन्ध स्वार्थज्ञाने जननीये तत्सहकारित्वम् ।

प्रमाणतत्त्वे निरूपयितव्ये महर्षे प्रमाणादितत्त्वप्रतिपादकशास्त्रप्रणेतृत्वाद्यभिधानस्य सफलत्व दर्शयति—प्रेक्षावदिति । प्रेक्षावता विवेचकानां प्रकृष्टफलोद्देशमन्तरेण शास्त्राध्ययनेऽप्रवतमानानामिति यावत् । तेषा स्वीयग्रन्थाध्ययने प्रवृत्त्यर्थमित्यर्थ । स्वीयग्रन्थस्य प्रयोजनवत्ता परमप्रयोजनीभूतनि श्रेयसरूपफलवत्तामभिधेयसबन्धा च प्रमाणतत्त्वरूप प्रतिपाद्य प्रतिपादकत्वरूप तत्सबन्धश्चाहेत्यन्वय

**End**

अनुमित्युपनीतेति । एकद्व्यादिक्षणान्तरितजन्मनि । तस्मिन्निति । प्रामाण्यानुमितितृतीयादिक्षणजातव्यवसाय इत्यर्थ । सुतरामसभवीति । तदनुव्यवसायपूर्व प्रामाण्यानुमितेरसत्त्वादिति भाव । विनश्यदवस्थपरामर्शजन्यानुमिते अनुव्यवसाये परामर्शोपनीतधूमवत्त्वस्य विशेष्यांशे न भानसभव । तत्पूर्व परामर्शनाशात् । एव धर्मितावच्छेदकधर्मवद्विशेष्यकत्वावच्छेदेनैव विशेषणप्रकारकत्वमनुव्यवसायो गृह्णातीति बौद्धाधिकारविवृतौ स्वय लिखितम् । तथासत्यनुमितौ साध्यव्याप्यस्य धर्मितावच्छेदकतया भाने तद्वति साध्यप्रकारकत्वस्यानुमित्यनुव्यवसाये भान न सभवति । अतो लिङ्गोपधानमतावलम्बेन मूलोक्त तदुपपादयति—धूमवतीत्यादि ॥

**Colophon**

इति गदाधरभट्टाचार्यविरचितो ज्ञप्तिप्रामाण्यवाद समाप्त ॥

श्रीदेशिकानुग्रहतो विपश्चिद्वङ्कचन्वयो देशिकनामधेय ।
प्रामाण्यचिन्तामणिदीधितीया गादाधरीं साधु लिलेख टीकाम् ॥

---

No 4041 तत्त्वचिन्तामणिदीधितिप्रकाशिका

TATTVACINTAMANIDIDHITIPRAKASIKA

Substance paper Size, 13¾ × 3⅞ inches Pages, 402 Lines, 17 on a page Character, Telugu Condition, good Appearance new

Up to Samanyabhava

Same work as the above

**Beginning**

अभिवन्द्य मुहु समादरात्पदपाथोजयुग पुरद्विष ।
विवृणोति गदाधरस्सुधीरतिदुर्बोधगिर शिरोमणे ॥

प्रारिप्सितसमाप्तिपरिपन्थिप्रत्यूहव्यूहविध्वसनपटीयसीं परमेश्वरप्रण तिमादौ निबध्नाति —ओमिति । समस्तैरकारोकारमकारै सन्धिवशेन प्रणवभावमावहद्भि अव्ययतया लुप्तचतुर्थीकैः प्रत्येकशक्त्योपस्थापितस्य वासुदेवादित्रयस्य अभेदेन परमात्मनो विशेषणत्वमत्राभिमतम् । अत्र च जगत्पालनादिकर्तृत्व नाकारादिपदार्थतावच्छेदकम् उद्देश्यतावच्छेद कस्य परमपदार्थधर्मस्यापि तद्रूपतयानन्वयापत्ते ।

नन्वेकानन्तरमपराभिधाने सङ्गतित्वमपेक्षित न तु तत्प्रदर्शनम्, तथा च प्रत्यक्षोपजीवकत्वादिना का[?]रत्वरूपसङ्गतिप्रदर्शनमफलम् । न च प्रत्यक्षानन्तरमनुमान निरूप्यत इत्यभिधाने तत्पूर्वमेव किमेतन्न निरूपितमित्याकाङ्क्षोदयान्निरूपणपौर्वापर्यनियामकस्य प्रत्यक्षानुमानयोरुप-जीव्योपजीवकभावस्य प्रदर्शनमावश्यकमिति वाच्यम् । निरूप्यनिरूपकयो-

रुपजीव्योपजीवकभावस्य निरूपकताश्रयनियामकताया स्वय दूषणीयतया स्वमतेक्रमनियामकाकाङ्क्षया तदभिधानसङ्गतेरित्या(शङ्का)परिजिहीर्षु सङ्गति-प्रदर्शनस्य प्रत्यक्षानुमानग्रन्थैकवाक्यताप्रतिपत्तिप्रयोजनकत्व निरूपणप्रति-ज्ञया निष्फलत्वाशङ्कानिराचिकीर्षया तस्या शिष्यावधानफलकत्व (च)दर्श यति—पूर्वापरेति ।

See under the next number for the end

---

No 4042 तत्त्वचिन्तामणिदीधितिप्रकाशिका

TATTVACINTAMANIDIDHITIPRAKASIKĀ

Substance, palm leaf Size, 16¾ × 1¾ inches Pages, 144 Lines 8 on a page Character Grantha Condition, good Appearance new

Badha and Satpratipaksa complete

Same work as the above

For the beginning, see under the previous number

End

इदन्तु बोध्यम्—

यादृशव्याप्तिज्ञानात् पक्षतावच्छेदकसाध्ययो केवलमेकत्र द्वयमि-(तिरी)त्या वैशिष्ट्यविषयिणी प्रमानुमिति , तत्प्रमात एव चेत् बाधवि-शेषाभावसहकृतात्पक्षतावच्छेदककालादिविशिष्टानुयोगिकसाध्यवैशिष्ट्यवि-षया भ्रमानुमितिर्भवेत्तदा गुणादौ द्रव्यवृत्तित्वाद्युपलक्षितसत्तादिवैशिष्ट्य विषयकानुमित्यौपयिकजात्यादिलिङ्गकप्रतियोगितावच्छेदकावच्छिन्नत्वाविशे-षितप्रतियोगिवैयधिकरण्यघटितव्याप्तिप्रमातोऽसति बाधावतारे तद्विशिष्ट-वैशिष्ट्यविषयकभ्रमानुमितिरपि तुल्ययुक्त्या भवेदित्युक्तव्याप्तौ प्रतियो-गितावच्छेदकावच्छिन्नवैयधिकरण्यानिवेशनमनर्थक स्यादिति दिक् ॥

Colophon

इति गदाधरभट्टाचार्यकृतौ बाधग्रन्थस्समाप्त ॥

गिरीन्द्रदुहितुर्नमत्सुरवरावतंसीभवत्पदाम्बुजरज कणाकलिततीक्ष्णधीसपदा ।
गदाधरविनिर्मिता कठिनदुर्गकर्तो(तर्का)टवीनवीनपदवी मुद वितनुता सदा
धीमताम् ॥

---

No 4043 तत्त्वचिन्तामणिदीधितिप्रकाशिका

TATTVACINTĀMANIDIDHIIIPRAKĀŚIKĀ

Substance, palm leaf Size 16½ × 1½ inches Pages 60 Lines, 7 on a page Character, Grantha Condition, injured Appearance, new

Begins on fol 1a The other work herein is Satpratipaksakrōdapatra 31a

By Gadadharabhatta

Nañvada complete

The transcription of this manuscript was completed on the 18th of the Karttika month in the year Dundubhi

Same work as the above

**Beginning**

राधामुखाब्जमधुमत्तमधुव्रतश्रीकृष्णस्य पादयुगल शिरसा प्रणम्य ।
नञ्वादसङ्गतशिरोमणिगूढभाव श्रीमान् गदाधरसुधीर्विशदीकरोति ॥

यद्यपि सादृश्यादय षडेव नञर्था , तदुक्तम्—

तत्सादृश्यमभावश्च तदन्यत्व तदल्पता ।
अप्राशस्त्य विरोधश्च नञर्थाष्षट प्रकीर्तिता ॥ इति ।

तथापि लक्षणयैव सादृश्याद्यर्थनिर्वाहे सादृश्याद्यर्थे शक्तिकल्पनमयुक्तम् ।

**End**

असामर्थ्ये च तादृशप्रतियोगिवाचकपदाभ्या नञसमभिव्याहारज्ञानस्य तादृशफलानुत्पादकतया तत्र तत्कारणत्वानुपगमाद्रिति भाव । आहुरित्यस्वरससूचनाय । स च प्रथमाविभक्त्या सङ्ख्याद्यतिरिक्तार्थबोधने तस्य असाधुतापत्तिरिति ॥

**Colophon**

इति श्रीगदाधरभट्टाचार्यकृता नञर्थदीधितिप्रकाशिका समाप्ता ॥
वात्स्यगोपालदासेन कोत्तिमङ्गलवासिना ।
गदाधरीयटीकेयं लिखिता नञ्शिरोमणे ॥

---

No 4044 तत्त्वचिन्तामणिदीधितिप्रकाशिका

TATTVACINTĀMANIDIDHITIPRAKAŚIKA

Substance, palm-leaf Size, 16¾ × 1¾ inches Pages, 20 Lines, 11 on a page Character, Grantha Condition, good Appearance, new

Paramātsavāda incomplete

Same work as the above

**Beginning**

अनुमिति प्रति पर्वतीयधूमव्यापको वह्निरित्याकारकपरामर्श एव हेतु न तु वह्निव्याप्यधूमवानित्याकारक, तद्धेतुत्वे कारणतावच्छेदककोटौ व्यापकसामानाधिकरण्यरूपव्याप्तिघटकीभूतसामानाधिकरण्यनिवेशाधिक्येन गौरवादिति तु व्यापकताज्ञानकारणतावादिन ।

**End**

तादृशसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टव्याप्य - प्रकारतावत्त्वतथाविधनिर्णयत्वयो स्वातन्त्र्येण निवेशे भवत्यवेयमनुपपत्ति

---

No 4045 तत्त्वचिन्तामणिदीधितिप्रकाशिका

TATTVACINTAMANIDIDHITIPRAKAŚIKA

Substance, palm-leaf Size, 20½ × 1⅝ inches Pages, 17 Lines, 9 on a page Character, Grantha Condition, injured Appearance, new

Caturdaśalakṣaṇī and Vyadhikaraṇadharmāvacchinnābhāvakhaṇḍana complete

Same work as the above

## No 4046 तत्त्वचिन्तामणिदीधितिप्रकाशिका
## TATTVACINTĀMANIDĪDHITIPRAKĀŚIKĀ

Pages, 44 Lines, 13 on a page

Begins on fol 1b of the MS described under No 3932

Contains only Sāmānyanirukti complete

Same work as the above

---

## No 4047 तत्त्वचिन्तामणिदीधितिप्रकाशिका
## TATTVACINTĀMANIDIDHITIPRAKĀŚIKĀ

Substance, paper Size, $11\frac{1}{4} \times 8\frac{3}{4}$ inches Pages, 136 Lines, 19 on a page Character, Telugu Condition, good Appearance, new

Paramarsavada complete

Same work as the above

---

## No 4048 तत्त्वचिन्तामणिदीधितिप्रकाशिका
## TATTVACINTĀMANIDIDHITIPRAKAŚIKA

Substance, palm leaf Size, $16\frac{3}{8} \times 1\frac{1}{4}$ inches Pages, 214 Lines 6 on a page Character, Grantha Condition, much injured Appearance, old

Begins on fol 1*a* The other work herein is Bhattadipika 108*a*

This contains the portion dealing with Paramarsa

Incomplete

Same work as the above

---

## No 4049 तत्त्वचिन्तामणिदीधितिप्रकाशिका
## TATTVACINTĀMANIDIDHITIPRAKĀSIKA

Substance, palm leaf Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches Pages, 196 Lines, 10 on a page Character, Grantha Condition, good Appearance, old

Pañcalaksani to Caturdasalaksani

Breaks off in Pucchalaksana

Same work as the above

## No 4050 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTAMANIDĪDHITIPRAKĀŚIKĀ

**Pages, 168 Lines 7 on a page**

Begins on fol 4a of the MS described under No 4010

Contains Savyabhicarasāmanyaniruktı, Sadharana, Asadhāranı and Anupasamharin

Same work as the above

इद पुस्तक चक्रवर्तिस्वहस्तलिखितम् ॥

---

## No 4051 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTĀMANIDIDHITIPRAKASIKĀ

Substance, palm-leaf Size, 18 × 1¾ inches Pages, 82 Lines 8 on a page Character, Telugu Condition good Appearance new

Samanyaniruktı and Savyabhicara incomplete

Same work as the above

---

## No 4052 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTAMANIDIDHITIPRAKAŚIKA

Substance, paper Size 1 ⅜ × 5⅜ inches Pages, 12 Lines 16 on a page Character Devanāgari Condition injured Appearance, old

Begins on fol 20a The other work herein is Tarkabhāsā 1a

Same work as the above

Wants 3 leaves in the beginning of Sāmanyaniruktı

## No 4053 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTAMANIDIDHITIPRAKĀŚIKA

Substance, palm-leaf (Śrītāla) Size, 20 × 2¼ inches Pages, 115 Lines, 13 on a page Character, Telugu Condition, good Appearance, new

Pañcalakṣaṇī and Caturdaśalakṣaṇī complete

Same work as the above

---

## No 4054 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTAMANIDIDHITIPRAKĀŚIKA

Substance, palm-leaf Size, 19 × 1⅞ inches Pages, 31 Lines, 9 on a page Character, Grantha Condition, good Appearance, not very old

Contains the Virōdhagrantha incomplete

Same work as the above

This manuscript is stated to have belonged to one Pillapakam Raghavachariar

---

## No 4055 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTAMANIDIDHITIPRAKĀŚIKA

Substance, palm leaf Size, 16⅜ × 1½ inches Pages, 96 Lines, 10 on a page Character Grantha Condition fair Appearance, old

This contains—

हेत्वाभाससामान्यलक्षण 1a } from the Cintamani
सव्यभिचारलक्षण 2a }

सव्यभिचारलक्षण from the Didhiti 5a

हेत्वाभास to the end of सव्यभिचारसामान्यनिरुक्ति from Gadadhariya 15a

Same work as the above

## No 4056 तत्त्वचिन्तामणिदीधितिप्रकाशिका.

### TATTVACINTĀMANIDĪDHITIPRAKĀŚIKĀ

Substance, paper Size, 12⅞ × 4⅜ inches Pages, 88 Lines, 12 on a page Character, Telugu Condition, good Appearance, new

This contains—

पक्षता 1a complete

दशाविशेषग्रन्थ 15a

सव्यभिचारग्रन्थ 19b incomplete

There are also 4 pages of Tattvacintamanididhiti (Vyapti) at the end

Same work as the above

---

## No 4057. तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKAŚIKA

Substance, paper Size 11⅝ × 4⅜ inches Pages, 164 Lines 6 on a page Character, Telugu Condition, good Appearance, new

Pañcalakṣaṇī and Caturdaśalakṣaṇī complete

Same work as the above

## No 4058 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKAŚIKA

Substance, palm-leaf Size, 17 × 1½ inches Pages, 136 Lines, 8 on a page Character, Grantha Condition slightly injured Appearance, old

Sāmānyanirukti and Pancalakṣaṇī complete in the Anumānaprakarana

By Gadādharabhattacarya

Same work as the above

## No 4059 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKĀŚIKĀ

Substance, palm leaf Size, 19¼ × 1¾ inches Pages, 94 Lines, 10 on a page Character, Grantha Condition, injured Appearance, old

By Gadadharabhatta

Avayava complete

Same work as the above

---

## No 4060 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKAŚIKA

Substance, palm-leaf (Śrītāla) Size, 18¾ × 2 inches Pages, 114 Lines, 11 on a page Character, Telugu Condition fair Appearance, old

Samanyanirukti and Avayava in Anumana complete

Same work as the above

---

## No 4061 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTAMANIDIDHITIPRAKAŚIKA

Pages, 231 Lines, 7 on a page

Begins on fol 12*a* of the MS described under No 3996

Anumanakhanda incomplete

Same work as the above

---

## No 4062 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKASIKA

Substance, palm leaf (Śrītāla) Size 20¾ × 2 inches Pages, 150 Lines, 11 on a page Character, Grantha Condition, slightly injured Appearance, old

Begins on fol 1*a* The other work herein is Caturdasalaksanikrōḍa 76*a*

Pañcalakṣaṇī to Caturdaśalakṣaṇī

Contains also portions of Dīdhiti

Same work as the above

---

## No 4063 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ

Substance, palm leaf Size 15¾ × 1¼ inches Pages, 86 Lines, 8 on a page Character Grantha Condition, good Appearance new

Anumitigrantha only

Same work as the above

## No 4064 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ

Substance, palm leaf Size, 19⅞ × 1⅝ inches Pages, 144 Lines, 8 on a page Character Grantha Condition much injured Appearance, old

Caturdaśalakṣaṇī only complete

Same work as the above

## No 4065 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ

Substance, palm leaf Size, 17¾ × 1¼ inches Pages, 252 Lines, 8 on a page Character Grantha Condition, slightly injured Appearance, new

Contains only Caturdaśalakṣaṇī complete

Same work as the above

## No 4066 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTAMANIDIDHITIPRAKAŚIKA

Substance, palm leaf Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches Pages 218 Lines, 10 on a page Character, Grantha Condition, good Appearance, new

The last leaf is half lost

Pakṣatāvada complete

This manuscript has also five leaves containing portions of Mani and Didhiti

Same work as the above

---

## No 4067 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTĀMANIDIDHITIPRAKAŚIKA

Substance, palm leaf Size $20\frac{1}{4} \times 1\frac{3}{8}$ inches Pages, 86 Lines, 12 on a page Character, Grantha Condition, good Appearance new

Avayava complete

This manuscript contains also Mani and Didhiti

Same work as the above

---

## No 4068 तत्त्वचिन्तामणिदीधितिप्रकाशिका

## TATTVACINTAMANIDIDHITIPRAKAŚIKA

Substance, palm-leaf Size $15\frac{3}{4} \times 1\frac{5}{8}$ inches Pages, 118 Lines, 7 on a page Character, Grantha Condition, good Appearance, new

Contains the Satpratipakṣa with Mani and Didhiti

Same work as the above

लक्ष्मीनारायणाख्यो निवसति विबुधानन्दचर्योविशालो
भारद्वाजान्ववायाम्बुधिहिमकिरणो विद्यया जन्मना च ।
रङ्गाचार्यार्यवर्यो निगमजलनिधिर्यस्य सूरिर्गुरुर्यो
वेदान्तज्ञानदानप्रमुदितहृदयानन्दसाधुस्सुधीश ॥

महतस्तस्य पुत्रेण श्रीनिवासमनीषिणा ।
लिखितस्सत्प्रतिपक्षोऽभूद्वेलामूर्ते(र्थे)न पाणिना ॥

---

## No 4069 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKĀSIKĀ

Substance, palm-leaf Size, $18\frac{3}{8} \times 1\frac{1}{4}$ inches Pages, 258 Lines, 8 on a page Character, Grantha Condition, a few leaves are injured in the beginning Appearance, not old

This contains the following parts of Didhiti and its commentary by Gadadhara —Paksatavicara fol 1*a*, its commentary 7*a*, Commentary on Samanyanirukti 65*a*, Samānyanirukti (Didhiti) 104*a*, commentary on Paksata by Jagadisa 112*a*, Anumanatippani 119*a*

Same work as the above

---

## No 4070 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKĀSIKA

Substance, palm leaf Size, $18\frac{1}{8} \times 1\frac{3}{8}$ inches Pages, 71 Lines, 8 on a page Character, Telugu Condition, much injured Appearance, old

Pratyaksapariccheda to the end of the first Vipratipatti in Pramanyavada

Same work as the above

---

## No 4071 तत्त्वचिन्तामणिदीधितिप्रकाशिका

### TATTVACINTĀMANIDIDHITIPRAKĀSIKA

Substance, paper Size $11\frac{1}{8} \times 4\frac{1}{4}$ inches Pages, 55 Lines, 13 to 15 on a page Character, Grantha and Telugu Condition, good Appearance, not old

Begins on fol 1*a* and 42*a* The other work herein is Tattvacintamanididhitivyākhyā (Jagadisi) 9*a*

Contains Gadadhara's Sadharanagrantha and Samanyanirukti

Incomplete

Same work as the above

---

No 4072 तत्त्वचिन्तामणिदीधितिप्रकाशिकासङ्ग्रह

TATTVACINTAMANIDIDHITIPRAKASIKA-SANGRAHAH

Pages, 11 Lines, 8 on a page

Begins on fol 1a of the MS described under No 3919

This is an epitome of the Tattvacintamanididhitiprakasika of Gadadhara and contains—

Sadharana, Satpratipaksa (Vyavaharika and Vibhajaka) and Badha

**Beginning** of साधारणमणि—

उच्यते विपक्षवृत्तित्व साधारणत्वम्, तन्मात्रस्य दूषकत्वात् । विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्ति(त्व)ज्ञानदशाया साधारणत्वम्, अन्यथा हेत्वाभासान्तरतापत्ते ।

**Beginning** of साधारणदीधिति—

अत्र विपक्षत्व साध्याभाववत्त्वम्, अनुपदमेव वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारण इति मूलग्रन्थ एव स्फुटतरमभिधानात् ।

**Beginning** of दीधितिप्रकाशिका—

तज्ज्ञानस्य निश्चयाशज्ञानस्य अप्रतिबन्धकत्वात् । व्याप्तेर्निश्चितसाध्याभाववद्वृत्तित्वाघटितत्वादिति भाव ।

**End**

तथा च उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तविशिष्टपक्ष विशिष्टसाध्यवैशिष्ट्यबोधीयविषयतान्त पातिप्रकारत्वावच्छिन्नप्रतिबध्यतानि - रूपिता सती स्वनिरूपितप्रतिबध्यतावच्छेदकविषयत्वावच्छिन्नप्रतिब ध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिजनकतावच्छे - दकविषयतानवच्छिन्ना या प्रतिबन्धकता तदवच्छेदकस्वानिरूपितविष- यताकत्वामिति निष्कर्ष – इति ॥

## No 4073 गदाधरीयव्याख्या–कृष्णभट्टीया

## GADADHARIYAVYAKHYA KRSNABHATIIYA

Substance palm leaf Size 18⅜ × 1⅜ inches Pages 3 Lines 8 on a page Character Grantha Condition, good Appearance old

Begins on fol 112a The other works herein are Gadadhariyakrodapatra 1a Samasavadartha 101a Nipatavadartha 105a

Contains Simhavyaghri incomplete

A commentary on the Tattvacintamanididhitiprakasika of Gadadhara by Krsnabhatta

**Beginning**

तदधिकरणेति । यद्यपि समानमधिकरण यस्येति स तथा, अधि- करणतावद्वृत्त्यधिकरणतानिरूपकमिति यावत्, तस्य भाव सामानाधि- करण्यम्, साध्यस्य सामानाधिकरण्य साध्यसामानाधिकरण्यम्, साध्य- सामानाधिकरण्यस्याभाव साध्यासामानाधिकरण्यमित्यव्ययीभाव, तथाच साध्याधिकरणावृत्तित्वलाभ ।

**End**

साध्येति । तादृशप्रतियोगितावच्छेदकत्वस्य अयोगोलकवृत्ति(त्व)त्वे अपर्याप्तत्वादतिव्याप्ति । हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वनिवेशे-चाव्याप्ति , अतो निरूपितत्वसम्बन्धेनेत्युक्तम्

---

## No 4074 गदाधरीयव्याख्या—कृष्णभट्टीया

### GADADHARIYAVYAKHYA KRSNABHATTIYA

Substance paper Size, 12¼ × 4 inches Pages 188 Lines 7 on a page Character, Dēvanāgari Condition, good Appearance, new

A commentary on Avayava-gadadhari

Contains Pratijñalaksana and Hetugrantha

Wants beginning and end

Same work as the above

**Beginning**

प्रमेयवद्धेतुत्वात् ज्ञेयत्वत्वाद्धेत्वा(द्धेत्या)दौ हेत्ववयववारणायान्यून-दले साध्यतावच्छेदकनिवेश । हेतुत्व प्रमेय वा प्रमेय[वा] प्रमेत्वा(या)-दित्यादौ धर्मितावच्छेदकाप्रवेशेन तादृशविशेष्यतानिरूपितसाध्यप्रकारता-सत्त्वान्नातिव्याप्तिप्रसङ्ग । पर्वतो वह्निमाम् वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादि-त्यादौ हेत्ववये(यवे)धर्मितावच्छेदकप्रवेशे तु प्रकृतपक्षमुख्यविशेष्यत्व वाच्यम् ।

**End**

हेतुत्व प्रमेय प्रमेयादित्यादौ हेतुजन्यबोधे हेतुत्वे आधेयतासम्ब-न्धेन विशेषणतापन्नप्रमेयांशे एव(प्र)कारत्वम् , न तु

## No 4075 गदाधरीयव्याख्या—कृष्णभट्टीया.

## GADADHARIYAVYĀKHYA KRSNABHATTIYA

Substance, palm-leaf Size, 16½ × 1½ inches Pages, 67 Lines, 9 on a page Character, Grantha Condition, injured Appearance, old

Contain Hētugrantha on Avayava

Incomplete

Same work as the above

**Beginning**

अन्यथा प्रतिज्ञानुत्तर(ज्ञा विना)। [पञ्चमवाक्यपूरणाय च] नन(नु) हेतुविभक्तिमत्त्वमित्यस्य हेतुत्व

तत्र धूमा(दा)लोकवान् पर्वतो वह्निमानिति प्रतिज्ञाया यो यो धूमवान् स वह्निमान् यथा धूमाद्वह्निमान् महान(स इ)त्युदाहरणे पर्वतो धूमादालोकवद्वृत्तिवह्निमानितिस्थलीयधूमालोकसमानाधिकरणवह्निव्याप्यधूमवानित्युपनयेन आलोकाद्वह्निसाध्यकप्रतिज्ञोदाहरणोपनये चातिव्याप्तेरकथनेन न्यूनतेत्याशङ्क्याह—प्रतिज्ञेति । विवक्षणीयेति ।

**End**

तथा च तादृशवाक्यघटितमलक्ष्य[त्व]मेवेति भाव । यद्वा कण्टकोद्धारो व्यभिचारादिदोषनिरासवाक्यम्, अय हेतुर्न व्यभिचारी नासिद्ध इत्यादिसम(म्म)तिप्रतिवादिना तदुद्भावनकालीनत्वादित्यर्थ ॥

**Colophon**

इत्यवयवग्रन्थे हेतुग्रन्थकृष्णभट्टीय सपूर्णम् ॥

## No 4076 गदाधरीयव्याख्या.

## GADĀDHARĪYAVYĀKHYĀ

Substance, palm leaf Size, 15⅝ × 1½ inches Pages, 58 Lines, 10 on a page Character, Grantha Condition, good Appearance, new

Begins on fol 1a There are herein some songs 32a

Complete

This contains brief notes on the Savyabhicarasamanjanirukti of Gadadhara

Author unknown

**Beginning**

ननु चिन्तामणिकारमते सत्प्रतिपक्षोत्थापकतया असाधारण्यस्य दूषकत्वात् साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यमिति न सर्वे- त्यादिग्रन्थासङ्गतिरित्यत आह—प्राचामिति । साध्याभावन्यूनवृत्तेरिति । पर्वतो वह्निमान् जल(व)त्त्वादित्यादेरित्यर्थ । तत्रापि यत्किञ्चिद्विपक्षव्या- वृत्तत्वस्य सत्त्वादिति भाव ।

**End**

अभिमतसाधकताविघटकाभावस्यैव निग्रहप्रयोजकतया अन्वयिमुद्र- या गमकता यत्राभिमता तत्र निग्रहायोगात् । व्यतिरेकिप्रयोगे निग्रह- स्येष्टत्वादिति ॥

**Colophon**

इति सव्यभिचारगदाधरीयटिप्पणी समाप्ता ॥

---

## No 4077 गदाधरीयव्याख्या

## GADADHARIYAVYĀKHYĀ

Substance, paper Size, 12 × 4¾ inches Pages, 95 Lines, 11 on a page Character, Telugu Condition, injured Appearance, old

Pañcalaksanī complete

Breaks off in Miśralakṣaṇa of Caturdaśalakṣaṇī

This is a commentary on the Tattvacintāmaṇidīdhitiprakāśikā of Gadadhara Author unknown

**Beginning**

समारब्धेति । वर्तमानकालध्वसप्रतियोगिनी सफला याधकृति तद्वि-षयीभूतेत्यर्थ । रभधातोराद्यकृति क्तप्रत्ययार्थौ विषयत्व वर्तमानध्वस-प्रतियोगित्वरूपमतीतत्वश्चार्थ ।

**End**

अन्यथा व्यधिकरणधर्मावच्छिन्नाभावस्य आकाशाभावाभिन्नतया कथमपि तत्र लक्षणागमनात् । तथा घटवृत्तित्वविशिष्टाकाशाभाव वान्मेयत्वादित्यादौ अव्याप्त्या साध्याभावत्वविशिष्टाधिकरणत्व वक्तव्य मित्यर्थ ॥

---

No **4078** गदाधरीयव्याख्या

GADADHA[illegible]IYAV[illegible]AKHYA

Substance palm leaf Size 16 x 1¾ inches Pages, 177 Lines 7 on a page Character Grantha Condition injured Appearance old

Sāmānyanirukti incomplete

Similar to the above

Author not known

**Beginning**

व्याप्त्यवच्छिन्नपक्षधर्मत्वावच्छिन्नोभयभेदोऽप्युपलक्षणम् । अबाधि तत्वावच्छिन्नघटिततृतीयभेद साध्य । तेन सङ्कीर्णबाधितो न बाध , अबाधितत्व यदि पक्षनिष्ठाभावप्रतियोगिसाध्यकत्वम् , ह्रदो वह्निमानित्या-दौ तदप्रसिद्धे ।

**End**

काञ्चनमयह्रदो वह्निमान् गगनादित्यादौ काञ्चनमयत्वव्यापकीभूता-भावप्रतियोगिगगनादिवारणाय उभयाभावनिवेशनम् , पक्षतासाध्यतावच्छे-

दकीभूताभावप्रतियोगिहेत्वविषयकत्वस्य निश्चयविशेषणत्वे गौरवात्, ए वञ्च ह्रदो वह्निमान् जलादित्यादौ वह्न्यभाववज्जलवत्यपि स्वरूपसम्बन्ध-घटिते नातिव्याप्ति । विशिष्टद्वयाघटितत्वन्तु असाधारण्यघटितविशिष्ट-द्वयघटितवारणाय आवश्यकमिति सामान्यत अवच्छेदकावच्छेदेन हेतु-मत्ताज्ञानघटितोभ

---

## No 4079 गदाधरीयव्याख्या

## GADADHARIYAVYAKHYA

Substance, palm-leaf Size, 15½ × 1¾ inches Pages 276 Lines 7 on a page Character Grantha Condition, good Appearance, old

Incomplete

Similar to the above

Author not known

**Beginning**

तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूले पञ्चम्यर्थस्य तज्ज्ञानजन्य-जिज्ञासाधीनत्वस्य निरूपणेऽन्वयादेव सङ्गतिप्रदर्शनसिद्धौ तत्प्रसङ्गादिति पूरणमनुचितमित्याशङ्का निरस्यति — हेत्वाभासेति । प्रसङ्गस्यापीति । स्मृतत्वे सत्युपोद्घातादिपञ्चकभिन्नस्य हेत्वाभासत्वस्यापीत्यर्थ । विरोधीति । तद्ग्रहप्रतिबन्धकग्रहविषय इत्यर्थ । वस्तुनस्तु तदसमानाधिकरणे-त्यर्थ ।

**End**

न तु धूमवान् वह्नेरित्यादौ सम्बन्धान्तरेण बाधविशिष्टव्यभिचारवि षयित्वस्य, यत्किञ्चिद्विषयित्वान्तर्गतस्य यद्धर्मावच्छिन्नानिरूपितत्वात्तदसा धारणतादृशविषयितात्वस्य यद्धर्मावच्छिन्ननिरूपितत्वव्यभिचारित्वाच्च । प्रथ-मे स्वपदेनेति

## No 4080. गदाधरीयव्याख्या
## GADĀDHARĪYAVYĀKHYĀ

Pages, 114 Lines, 10 on a page

Begins on fol 1a of the MS described under No 4006
Commentary on Samanyanirukti incomplete
Author unknown

**Beginning**

तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूले पञ्चम्यर्थस्य तज्ज्ञानजन्यजिज्ञासाधीनत्वस्य निरूपणे अन्वयादेव सङ्गतिप्रदर्शनसिद्धौ तत्प्रसङ्गादिति पूरणमनुचितमित्याशङ्का निरस्यति—हेत्वाभासेति । प्रसङ्गस्यापीति स्मृतत्वे सति उपोद्घातादिपञ्चकभिन्नस्य हेत्वाभासस्यापीत्यर्थः ।

**End**

नियमत विशिष्टान्तरविषयित्वाप्रयोज्यत्वेनैतल्लक्षणासत्त्वेऽपि यथाश्रुतविशिष्टान्तराघटितत्वघटितैतल्लक्षणासत्त्वेऽपि च न क्षति । तदुद्भावने निग्रहापत्त्या तस्य दोषपदार्थत्वानुपगमादिति

## No 4081 गदाधरीयव्याख्यानम्—चन्द्रनारायणीयम्
## GADĀDHARĪYAVYAKHYANAM CANDRA-NARAYANIYAM

Substance, paper Size 13¼ × 4¼ inches Pages, 86 Lines, 9 on a page Character, Grantha and Dēvanāgari Condition, good Appearance, new

Begins on fol 1a The other works herein are Samanya niruktipatra 45a, Samanyaniruktiprathamalakṣanavicara 70a, Tryambakasastripatra 86a

A commentary on Gadadhariya by Candranarayana
Samanyanirukti complete

**Beginning**

अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति हेत्वाभासलक्षणे अनुमितिपदस्य तत्पक्षकतत्साध्यकानुमितिपरत्वे पर्वतो धूमवान्

वह्नेरित्यत्र धूमाभाववद्व(द्वृत्तिव)ह्निरूपव्यभिचारे अव्याप्ति , व्यभिचार-ग्रहस्य व्याप्तिग्रह प्रत्येव प्रतिबन्धकतया तत्पक्षकतत्साध्यकानुमितिं प्रत्यप्रतिबन्धकत्वादिति ।

**End**

किन्तु घटत्वादेरेव तदवच्छिन्नविषयत्वावच्छिन्नप्रतिबन्धकतायास्तत्र सत्त्वात् , तत्र चानुमितिप्रतिबन्धकताया(अ)सत्त्वात् , अतो निश्चयपदम् । यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयतानिवेशे चाननुगमो दुर्वार एवेति परैरननुशीलित पन्था ॥

---

No **4082** गदाधरीयव्याख्या

GADADHARIYAVYĀKHYĀ

Substance, palm-leaf Size, 12¾ × 1¾ inches Pages, 94 Lines, 7 on a page Character Grantha Condition injured Appearance, not old

A commentary on Gadadhariya by Sankarabhatta

Pañcalakṣaṇi incomplete

**Beginning**

ननु वह्निव्याप्यो धूम इति ज्ञान प्रमाण प्रमितिजनकतावच्छेद-(क)रूपवत्त्वात् इन्द्रियवदिति अनुमानेन धूमज्ञानत्वसामानाधिकरण्येन प्रामाण्यप्रमितिजनकतावच्छेदकरूपव्याप्तिनिश्चयत्वहेतुना नैयायिकेन साधितम्, तच्च न सम्भवति हेतोरसिद्धे ।

**End**

किन्त्वत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्साध्यकत्वम् , तच्च गुरु-धर्मावच्छिन्नसाध्यकेऽपि वर्तत इति नानुपपत्तिरित्याशयेनाह—तादृश-गुरुधर्मावच्छिन्नेति । ननु घटत्वविशिष्ट

No 4083 गदाधरीयव्याख्या–शङ्करभट्टीया.

GADĀDHARĪYAVYĀKHYĀ SANKARABHATTIYA

Substance, palm-leaf Size, $18\frac{3}{4} \times 1\frac{1}{8}$ inches Pages, 110 Lines, 11 on a page Character, Grantha Condition, injured Appearance, old

Contains the following parts – Samanyanirukti 1a, incomplete Avayava 29a up to Pratijñalaksana Paksata 45a complete Savyabhicarasamānyanirukti incomplete

By Śankarabhatta

Similar to the above

**Beginning**

अनुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयत्वरूपसबन्धला भाय सबन्धिपदमिति गदाधरोक्तम् । तत्कल्पे पर्वतो वह्निमान् ह्रदश्च तथेति समूहालम्बनानुमितिप्रतिबन्धकयथार्थज्ञानविषयवह्न्यभाववद्ध्रदादेर्दोष त्वापत्ति ।

**End**

अधिकरणत्वावच्छेदेन गगनाभाववदधिकरणस्य शुद्धस्वरूपसबन्धेन गगनाभाववदधिकरणात्मकविशिष्टान्तरघटितत्वेनैव सम्भवादितिचेन्न , तस्यापि लक्षणान्तरत्वात् ॥

---

No 4084 न्यायरत्नम्–गदाधरीयटिप्पणम्

NYĀYARATNAM GADADHARIYATIPPANAM

समवेतनाशत्वस्य जन्यतावच्छेदकत्वेन कपालनिष्ठतद्व्यक्तित्वं तत्कपालस्वरूपं तदीयरसादिरूपं वेति विनिगमनाविरहेण रूपरसादिभेदेन कारणताबाहुल्येन तद्रूपनाशत्वादिना तन्नाशनिष्ठतद्व्यक्तित्वादीनामेव कार्यतावच्छेदक(त्व)मिति वाच्यम् ।

**End:**

ताद्दशजातेर्नानात्वे सयोगनाशहेतुताया व्यभिचारप्रसङ्गात् कार्यता-वच्छेदकजातेश्च नानात्वव्यभिचा(रा)भावादिति कृत पल्लवितेनेति दिक् ॥

**Colophon**

इति द्रव्यनाशरहस्यम् ॥

---

No 4250 धर्मितावच्छेदकवाद

DHARMITĀVACCHĒDAKAVĀDAH

Substance, palm-leaf Size, 17¼ × 1⅝ inches Pages, 34 Lines, 10 on a page Character, Telugu Condition, good Appearance, new

Begins on fol 64*a* The other work herein is Vyutpattivāda 1*a*

A discussion bearing on an aspect of logical inference

Complete

By Harirāma

**Beginning**

अनुमितिपरामर्शयो कार्यकारणभावघटकप्रत्यासत्ति सामानाधिकरण्यम् । तेन एकपुरुषीयपरामर्शदशाया तज्जन्यपुरुषान्तरस्य नानुमिति, तस्य समवायरूपकारणतावच्छेदकसबन्धेन परामर्शानधिकरणत्वात् । अत्र नवीनाः—

समानधर्मितावच्छेदकत्वमनुमितिपरामर्शयो कार्यकारणभावघटक प्रत्यासत्ति, सामानाधिकरण्यप्रत्यासत्तिकत्वे एकधर्मावच्छिन्नविशेष्यक-परामर्शदशायामन्यधर्मावच्छिन्नविशेष्यकानुमित्यापत्तिवारणाय धर्मितावच्छेदकाना विशिष्य निवेशनीयतया धर्मितावच्छेदकभेदेन कार्यकारणभावबाहुल्यप्रसङ्गात् ।

**End :**

समवायप्रत्यासत्तिकल्पे विषयभेदेन लिङ्गभेदेन च भिन्नासु परामर्शहेतुतासु पूर्वोपदर्शितविनिगमनाविरहेण अनन्तकारणताविकल्पात्तदपेक्षया आत्मव्यक्तिभेदेनैव उपदर्शितकारणताकल्पनस्यैवोचितत्वादित्याहु ॥

**Colophon**

इति श्रीहरिरामविरचिते धर्मितावच्छेदकवादस्समाप्त ॥

श्रीमोक्षकुण्डान्वयसुधाम्बुधिजैवातृकेण वरदराजसूरिणा विलिखितं समाप्तम् ॥

---

No **4251** धर्मितावच्छेदकवादः.

DHARMITĀVACCHEDAKAVĀDAH

Substance, palm-leaf Size, $18\frac{3}{4} \times 1\frac{5}{8}$ inches Pages, 34 Lines, 12 on a page Character, Telugu Condition, injured Appearance, old

Complete

Same work as the above The slight difference in the colophon is worth noticing

**Colophon :**

इति श्रीभट्टाचार्यहरिरामतर्कवागीशकृतौ धर्मितावच्छेदकप्रत्यासत्तिविचारस्समाप्त ॥

---

No **4252** नञ्वादशिरोमणि .

NAÑVĀDAŚIRŌMANIH

Substance, palm leaf Size, $15 \times 1$ inches Pages, 6 Lines, 6 on a page Character, Grantha. Condition, slightly injured Appearance, old

Begins on fol 67*a* The other works herein are Padārthatattvanirūpaṇa 1*a*, Padārthatattvanirūpanavyākhyā 10*a*, Nañvādaśirōmanivyākhyā 70*a*

By Śirōmani-bhaṭṭācārya

A discussion of the various meanings of the negative particle known as Nañ in Sanskrit

Complete

**Beginning**

ससर्गाभावश्चान्योन्याभावश्च नञर्थ । तत्रान्वयितावच्छेदकाव-च्छिन्नप्रतियोगिताकत्व व्युत्पत्तिबलसिद्धम्, नीलघटवति न घट, नील-घटो न घट इत्यव्यवहारात्, इह पीतघटवति न नीलघट, पीतघटो न नीलघट इति व्यवहाराच्च । प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ । तेन यत्पदोपस्थापितस्य प्रतियोगिनोऽनुयोगिन्याधाराधेयभावसम्बन्धेनान्वय, तत्र ससर्गाभावस्यापि तथा । यथा—पचति चैत्र, न पचति चैत्र, चैत्रस्येद, नेद चैत्रस्य–इत्यादि ।

**End**

अन्योन्याभावबोधने नञो न सामर्थ्यम् । तेन न पचति, न राज्ञ इत्यादौ कृत्यादेरन्योन्याभाव, भूतल(ले) न घट इत्यादौ घटादेस्सस गोभावो न प्रतीयत इत्याहु ॥

**Colophon**

इति श्रीमद्विद्वत्कुलतिलकश्रीमदद्वैतविद्याचार्यश्रीमच्छिरोमणिभट्टा चार्यप्रणीतश्रीमत्समस्तपण्डितकुलतिलकश्लाघनीययुक्तिमुक्ताफलगुम्फितो न ञ्शिरोमणि ॥

---

No **4253** नञ्वादशिरोमणि (नञ्विवेक)

NAÑVADAŚIROMANIH (NAÑVIVEKAH)

Pages 6 Lines, 6 on a page

Begins on fol 5*a* of the **MS** described under No 3916

Same work as the above with a difference in the colophon only

**Colophon**

श्रीतार्किकशिरोमणिभट्टाचार्यकृतौ नञ्विवेकस्समास ॥

## No 4254 नञ्वादशिरोमणिव्याख्यानम्—नञ्विवेचनम्
## NAÑVĀDAŚIRŌMAṆIVYĀKHYĀNAM
## NAÑVIVĒCANAM

Pages, 46 Lines, 7 on a page

Begins on fol 70 of the MS described under No 4252

A commentary on the Nañvāda of Śirōmaṇi-bhaṭṭācārya

By Raghudēva-Nyāyālaṅkāra

Incomplete

**Beginning**

शिवं प्रणम्य तत्पश्चात् तर्कवागीश्वरं गुरुम् ।
क्रियते रघुदेवेन नञ्वादे सुविवेचनम् ॥

प्रसङ्गसङ्गत्या नञ्शक्यतावच्छेदकं व्यवस्थापयति—संसर्गाभावत्वे-त्यादि । संसर्गाभावत्वमन्योन्याभावत्वं (च) नञ्शक्यतावच्छेदकमित्यर्थः । संसर्गाभावत्वं ध्वंसप्रागभावादौ संसर्गाभाव इति प्रतीतिसाक्षिकोऽखण्डोपाधिः । केचित्तु संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वम् । न चाभावबुद्धौ प्रतियोगिसंसर्गारोपस्य हेतुत्वे मानाभावान्नैवमिति वाच्यम् ।

For the end, see under the next number

---

## No 4255 नञ्वादशिरोमणिव्याख्यानम्—नञ्विवेचनम्
## NAÑVĀDAŚIRŌMAṆIVYĀKHYĀNAM
## NAÑVIVĒCANAM

Pages, 16 Lines, 10 on a page

Begins on fol 1a of the MS described under No 4005

A commentary on the Nañvadaśirōmaṇi of Raghunātha-śirōmaṇi

By Raghudēvanyayālaṅkāra

The first leaf is wanting There are 2 pages of the original text also in this manuscript

Same work as the above

See under the previous number for the beginning

**End.**

न च दुग्ध न दधि इत्यादौ दधिपदोत्तरलुप्तविभक्तेरनुसन्धान विनापि शाब्दबोधस्यानुभवसिद्धस्यापि लाभो बोध्य ॥

अत्रानुक्त दुरुक्त वा यत्किञ्चिज्जल्पित मया ।
तत्सर्वं जगदीशस्य प्रीत्यर्थं स्यादनिन्दितम् ॥
रघुदेवकृतग्रन्थालोकनेन मनीषिण ।
अध्यापयन्तु सन्तोषैर्नञ्वादमविवादत ॥

**Colophon**

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता नञ्वादव्याख्या समाप्ता ॥

यडवेल्लिकुलोद्भूततिम्मनाख्यबुधो मुदा ।
रघुदेवकृता टीका व्यलिखन्नञ्शिरोमणे ॥

---

No 4256 नञ्वादार्थप्रदीप..

NAÑVĀDĀRTHAPRADĪPAH

Pages, 27 Lines, 6 on a page

Begins on fol 7b of the MS described under No 3916

Complete

By Bhavānanda

This is another commentary on the Nañvada of Raghunātha-Śirōmani

**Beginning**

ससर्गाभाव इति । शक्यतावच्छेदकभेदेन शक्तिभेदसूचनायोक्तिभेद । तथा च ससर्गाभावत्वमन्योन्याभावत्व च नञर्थशक्यतावच्छेदकमित्यर्थ । न च लाघवात्सर्वसाधारणमभावत्वमेव शक्यतावच्छेदकमस्तु, तत्तत्समभिव्याहारवशात् समवायावच्छिन्नायास्तादात्म्यावच्छिन्नाया प्रतियोगितायास्ससर्गतया भानेनैव वैलक्षण्यमिति वाच्यम् ।

**End:**

तावतापि भूतले न घट इत्यादौ घटपदोत्तरसप्तम्या( ) प्रतियोगि-
त्वादौ लक्षणया भूतले घटप्रतियोगिक संसर्गाभाव इति बोधस्य वार-
णासम्भवात् । कृतिसम्बन्धादेरिति । न पचतीत्यत्र कृति(ते.), न राज्ञ
इत्यत्र सम्बन्धस्य नान्योन्याभावबोधनमित्यर्थ ॥

श्रीभवानन्दसिद्धान्तवागीशेन विनिर्मित ।
नञ्वादार्थप्रदीपोऽय निहन्तु सुधिया तम ॥

---

## No 4257 नित्यसुखवाद .
## NITYASUKHAVADAH

Pages, 7 Lines, 7 on a page

Begins on fol 57*b* of the MS described under No 3922

This is a discussion as to whether the Supreme Being is characterised by blissfulness

Incomplete

**Beginning**

ईश्वरस्सुखवान् न वेति विप्रतिपत्ति ।

अत्र प्राश्च —

ईश्वरो न सुखवान् सुखसामग्र्यभावादिति । तथाहि—धर्मात्सुखमध-
र्माद्दुःखमिति दर्शनात् धर्मत्वेन सुखत्वेनैव लाघवात्कार्यकारणभाव इति
धर्माभावादीश्वरे न सुखमिति ।

**End**

यथात्रैकत्र विशेषणत्वोपस्थापितस्यापि तादृशस्यापरत्रान्वयो निराबाध ,
तथा शब्दमण्यालोकविस्तरे विवेचयिष्याम इत्याहु । एवञ्च आनन्द
ब्रह्मणो रूपमित्यत्रानन्दश.

## No 4258 निपातवादार्थ

## NIPĀTAVĀDĀRTHAH

Pages, 14 Lines, 6 on a page

Begins on fol 105*a* of the MS described under No 4073

A discussion of the various meanings of indeclinable particles

Complete

**Beginning**

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
निपाताना वाचकत्व सम्यगत्र विचार्यते ॥

अत्र निपाताना वाचकत्व द्योतकत्व वेति विप्रतिपत्ति । द्योतकत्व वैयाकरणा ।

तथाहि—

साक्षात्क्रियते घट इत्यत्र साक्षात्पदस्य प्रत्यक्षार्थकत्वे कृञ्धातोश्च यत्नार्थकत्वेऽन्वयानुपपत्ति ।

**End**

मन्मते तु घटकर्मणो(को)मत्कर्तृकसाक्षात्कार इति कर्तृकर्माख्यातयोरविशेष एवान्वयबोध इति नञो द्योतकतैव ॥

***Colophon***

निपातवादार्थ ॥

---

## No 4259 पक्षताक्रोड

## PAKSATĀKRODAH

Pages, 19 Lines, 11 on a page

Begins on fol 20*a* of the MS described under No 4236

By Candranārāyana

A discussion relating to the nature of a proposition

Incomplete

**Beginning**

ननु यद्धर्मिकयत्सम्बन्धावच्छिन्नयत्प्रकारकनिश्चयत्वेन यत्संशयं प्रति निवर्तकत्वं स संशयः तद्धर्मिकतत्सम्बन्धसंसर्गकतत्साध्यकानुमितौ हेतुभूता पक्षता इति । अत्र साध्यतावच्छेदकसम्बन्धावच्छिन्ने साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयः पक्षतेति— निष्कर्षः ।

अत्रेयमापत्तिः—

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयत्वनिवेशेनैवोक्तानुगमसम्भवे निश्चयपर्यन्तानुधावनं व्यर्थम् ।

**End**

तथा चोक्तबाधघटकजलवद्ध्रदत्वावच्छिन्नविषयताया अपि सत्प्रतिपक्षज्ञानप्रतिबन्धकतावच्छेदकतया प्रकृतानुमित्यवृत्तितया तन्निरूपकतावच्छेदकजलवद्ध्रदत्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वस्योक्तबाधत्वाद्यभावात् । अतः प्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिवेश इत्याहुः ॥

## No 4260 पक्षताक्रोडः

## PAKSATAKRODAH

Substance, palm-leaf Size $14\frac{1}{4} \times 1\frac{5}{8}$ inches Pages, 28 Lines, 10 on a page *Character, Grantha* *Condition, injured* *Appearance, old*

Begins on fol 39*a* The other work herein is Śatakōṭikhaṇḍanamaṇḍana 1*a*

Incomplete

Similar to the above

Author unknown

**Beginning**

सत्यपि परामर्शादौ पक्षे साध्यनिर्णयदशाया विनानुमित्सामनुमित्य-
नुदयात् अनुमितिं प्रति पक्षताया हेतुत्व कल्प्यते
अथैवमपि पर्वतो वह्निमानित्येतादृशसिद्धिकाले अधिकविषयिण्या अपि
नीलपर्वतो वह्निमान् पर्वतस्सुन्दरवह्निमानित्याकारकानुमितेरनुदयापत्ति। ।
पर्वतत्वादिपर्याप्तोद्देश्यतावच्छेदकताकत्वस्य वह्नित्वपर्याप्तविधेयतावच्छेदक-
त्वस्य च निवेशेऽप्यभिस्तार ।

**End**

वह्निमान् पर्वतो घटवानित्याद्यनुमितिं प्रति सिद्ध्यादिप्रतिबन्धकता
यामपि पर्वतो वह्न्यभाववानित्येतादृशबाधाभावादिनिवेश(शे)न बाधकाले
तादृशानुमितिवारणसभवात् । एवमभावस्य तत्तद्व्यक्तित्वेन हेतुतायामेक
प्रतिबध्यप्रतिबन्धकभावपरिशेषापत्तिरिति दिक् । अथानुमितिं प्रति साध्य-
निर्णयत्वेन प्रतिबन्धकत्वकल्पनापेक्षया

---

## No 4261 पञ्चमविषयताविचार.

## PAÑCAMAVISAYATĀVICĀRAH

Substance palm leaf Size, 18½ × 1½ inches Pages, 12 Lines, 7 on a page Character, Grantha Condition, good Appearance, new

Begins on fol 35*a* The other works herein are Śatakōti 1*a*, Samānabalavicāra 14*a*, Bādhakrōdapatra 27*a*, Sādhāranavicāra 41*a*, Sāmānyaniruktipatra 51*a*

A critical discussion of Pañcamavisayata which forms a part of Gadhādhara's discussion of the five limbs of a syllogism

Incomplete

**Beginning**

पञ्चमविषयताशे विशेषणविधयानुमितिजनकतावच्छेदकतापर्याप्त्य-
धिकरणीभूतो यो धर्म . .

लिङ्गत्वाविषयकत्व प्रतिज्ञालक्षणे गदाधरभट्टाचार्यै परिष्कृतम् । अथात्र तादृशधर्मावच्छिन्नविषयत्वावच्छिन्नत्व प्रतिबन्धकताया निविष्ट तादृशधर्मावच्छिन्नविषयतानिष्ठावच्छेदकताकत्व, तादृशधर्मावच्छिन्नाश्रयविषयतानिष्ठावच्छेदकताकत्व वा, उभयमपि न सम्भवति ।

**End**

उक्तस्थले अधिकरणविषयतायास्साध्यनिष्ठप्रकारतानिरूपितत्वेऽपि तन्निष्ठधर्मितावच्छेदकत्वाभावादिति वाच्यम्, साध्याभावव्यापकतावच्छेदकहेत्वभाववत्प्रतियोगिहेतुमान्

---

## No 4262. पदार्थतत्त्वनिरूपणम्.

## PADĀRTHATATTVANIRŪPANAM

Pages, 17 Lines, 5 on a page

Begins on fol 1a of the MS described under No 4252

By Bhattācaryasirōmani

An examination of the nature of the various categories

Complete

**Beginning**

(ओं नमस्सर्वभूतानि विष्टभ्य प)रिवर्तते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अथ पदार्थतत्त्व निरूप्यते — तत्र दिक्कालौ नेश्वरादति(रिच्येते मानाभावात्)तत्तन्निमित्तविशेषसमवधानवशात् ईश्वरादेव तत्तत्कार्यविशेषणामुपपत्ते । परेषामे(कैकस्माद्दिगादेरिव)विलक्षणाना प्राच्यादिव्यवहाराणा शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिका(रणत्वम्) ।

**End**

कारणत्वप्रतियोगित्वमेव कार्यत्वमिति चेत् कार्यत्वप्रतियोगित्वमेव कारणत्वमपि किन्न रोचते ? तस्मात् कारणत्वश्चोभयभिन्नमेवेति कृत पल्लवेन ॥

अर्थाना युक्तिसिद्धाना मदुक्ताना प्रयत्नत ।
सर्वदर्शनसिद्धान्तविरोधो नैव दूषणम् ॥
अर्थाना युक्तिसिद्धान्ताविरोधेनैव पण्डिता ।
विना विचार न त्याज्या तद्विचाराय(विचारयत)यत्नत ॥
सर्वशास्त्रानु(र्थ)तत्त्वज्ञान् नत्वा नत्वा भवादृशान् ।
इद प्रोचे मदुक्तानि विचारयत सादरम् ॥
नातिरोषो(रीतिरेषा) न दोषाय सेविता पूर्वपाण्डितै ।
यन्निजोक्तिविचाराय याचते विदुषो(ष ) परान् ॥

**Colophon**

इति श्रीमहोपाध्यायश्रीमद्भट्टाचार्यशिरोमणिविरचित पदार्थतत्त्वनिरूपण समाप्तम् ॥

---

## No 4263 पदार्थतत्त्वनिरूपणम्

## PADĀRTHATATTVANIRUPANAM

**Pages, 11** Lines, 7 on a page

Begins on fol 1*a* of the MS described under No 3918

Complete

Same work as the above

---

## No 4264 पदार्थतत्त्वनिरूपणव्याख्या

## PADARTHATATTVANIRŪPANAVYĀKHYĀ

**Pages, 118** Lines, 6 on a page

Begins on fol 10*a* of the MS described under No 4252

A commentary on the Padarthatattvanirupana of Raghunathaśirōmanı by Raghudēvanyayalankāra

Complete

**Beginning**

नन्दनन्दनपदद्व(द्व)न्द्व निधाय हृदि चिन्तय(न्) ।
तनोति कुत्र(त्रु)क किञ्चिद्रघुदेवस्समासत ॥

कामहस्तधृतसास्त्रकामुक पौष्पमद्भुतमुदीक्ष्य कुप्यत ।
धूर्जटेर्नयनकोणशोणता हन्तु सर्वजगतामुपद्रवम् ॥

पदार्थतत्त्व यदिद शिरोमणिर्निर्णीतवान् जीर्णमतस्य दूषणै ।
तदेव तर्केण विचारयामस्सदर्थकेनेतरखण्डनेन ॥

प्रसङ्गात् पदार्थतत्त्व निर्वक्तु शिष्यावधानाय प्रतिजानीते—अथेत्यादि । नञ्पदादे ससर्गाभावत्वान्योन्याभावत्वादौ शक्यतावच्छेदकत्वव्यवस्थापनानन्तर प्राचीनाभ्युपेतपदार्थाना कस्यचिदनतिरिक्तत्व, कस्यचित्खण्डन, कस्यचिदतिरिक्तत्व तर्केण व्यवस्थाप्यत इत्यर्थ । तत्रेति । प्राचीनाभिमतपदार्थेषु मध्य इत्यर्थ । दिक्कालावित्यादि । दिक्कालयोरतिरिक्तत्व यत्प्राचीनैस्स्वीकृतम्, तन्न युक्तिसिद्धम् । तयोरतिरिक्तत्वे मानाभावादित्यर्थ ।

**End**

नन्वप्रयोजका एव त्वदर्था इत्यत आह—

युक्तिसिद्धानामिति । मदुक्ताना नान्येनोक्ताना दर्शन शास्त्र भवादृशान् पण्डितान् एषा पूर्वश्लोकोक्ता पूर्वपण्डितै वाचस्पतिमिश्रादिभि । परानिति । पण्डितानामि(नि)त्यर्थ ॥

पदार्थखण्डनाक्रात(न्त)पुरुहूतपुरोहितम् ।
शिरोमणिमह वन्दे शिरोमणिमिवाद्भुतम् ॥

श्रीमद्दीधिति(कार)कल्पितमहाकोलाहलव्याकुले
मार्गे सञ्चरणाय यानि(यन्ति)गदित सिद्धान्तसिद्धेतरत् ।

दैवात्तेन भवेद्यदीह सहसा प्रौढापराधो मम

क्षन्तव्य कृतिभि श्रुतो यदि भवेद्यक्का(क्षा)नुरूपाद्याव(पो ब)लि ॥

**Colophon**

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता पदार्थखण्डनव्याख्या समाप्ता ॥

---

No **4265** पदार्थखण्डनशिरोमणिव्याख्या

PADĀRTHKHANDANAŚIROMANIVYĀKHYĀ

Pages 54 Lines, 7 on a page

Begins on fol 7a of the MS described under No 3918

A commentary on the Padarthatattvanirupana of Śirōmani by Jayarāma The change in the name of the original work is worth noticing

Complete

**Beginning**

तातस्य तर्कसरसीरुहकाननेषु चूडामणेर्दिनमणेश्चरणौ प्रणम्य ।

श्रीरामभद्रसुकृती कृतिना हिताय लीलावशात्किमपि कौतुकमातनोति ॥

तत्र तेषु पदार्थेषु । दिक्कालाविति । पूर्वस्या घट इत्यादिप्रतीतिविषयविभुत्वमिह दिक्त्व, कालत्वश्च इदानीं घट इत्यादिप्रतीतिविषयविभुत्वमिह कालत्वम्, अतो न सिद्ध्यसिद्धि(भ्या) व्याघात , न वा घटादावशतो बाध । पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायामतिरिक्तदिगादेर्निराकरणानुपपत्ते ।

**End**

अनत्रार्थे तादृशबोधस्य फलस्य प्रामाणिकत्वे तद्बोधाय प्रकारतातिरिक्तसबन्धस्यैव कार्यतावच्छेदकत्वात् अन्यथानुपपत्तेर्दुर्वारत्वादिति परमरहस्यमत्रानुसन्धेयम् ॥

**Colophon**

इति श्रीन्यायवाचस्पतिभट्टाचार्यजयरामेण विरचिता पदार्थखण्डन शिरोमणिव्याख्या समाप्ता ॥

---

No **4266** पदार्थतत्त्वविवेक

PADARTHATATTVAVIVĒKAH

Substance, palm leaf Size, 17 × 1 inches Pages, 176 Lines, 5 on a page Character, Telugu Condition, injured Appearance, old

Breaks off in Śabda-pariccheda

A work on the categories by a pupil of Lakṣmanaguru

The subject matter of the work is similar to that of what is described under No 4264

**Beginning**

(आलम्बे) जगदालम्ब लम्बोदरपदाम्बुजम् ।
शुध्यन्ति यद्रजस्स्पर्शात्सद्य प्रत्यूहवार्द्धय ॥

नत्वा विश्वेश्वर साम्ब गुरु श्रीलक्ष्मणाभिधम् ।
द्रव्यादीना पदार्थाना विवेक क्रि(यतेऽधुना) ॥

(स्वामि)मतकर्मारम्भसमये सर्वे शिष्टा मङ्गलमाचरन्ति । तस्य न समाप्ति फलम्, कृतेऽपि मङ्गले असमाप्ते, अकृतेऽपि मङ्गले समाप्तेश्च ।

* * * *

विभागे स्वतन्त्रेच्छाया नियामकत्वादिति दिक् ॥

**Colophon**

इति प्रत्यक्षपरिच्छेद समाप्तः ॥

**End.**

अनादिप्रयोगानुसारिणी लक्षणा निरूढलक्षणा, यथा—नीलपदस्य नीलवति । यत्र मानान्तरात् रूढ्यर्थसम्बन्धिनि तात्पर्यमवधार्यते, तत्र रूढिपूर्विका लक्षणा, यथा—मण्डपपदस्य गृहसम्बन्धिनि पुरुषे.

---

No 4267 पदार्थमाला

PADĀRTHAMĀLA

Substance, palm leaf Size, 15¾ × 1⅜ inches Pages, 80 Lines, 8 on a page Character, Grantha Condition, injured Appearance, new

Contains Dravyanirūpana complete

Breaks off in Gunanirupana

By Jayarāma

A work similar to the one described under 4264

**Beginning**

स्वीकृतकुपितयशोदाश्रमहरगोदामबन्धनव्यसनम् ।
नलिनीदलसुकुमारं नन्दकुमारं नमस्याम ॥

श्रीमता जयरामेण युक्तिमौक्तिकगुम्भिता ।
पदार्थमाला विदुषां प्रमोदाय वितन्यते ॥

साधर्म्यवैधर्म्याभ्यां निखिलपदार्थतत्त्वज्ञानं निःश्रेयसोपयोगीति पदार्थास्तद्धर्माश्च निरूप्यन्ते—

तत्र पदार्था द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः । अत्र पदार्थमात्रमुद्दिश्य द्रव्याद्यन्यतमत्वेन विधानात् द्रव्याद्यन्यतमत्वेन पदार्थव्यापकत्वं लभ्यते ।

**End:**

प्रकृते साधकम्, किन्तु बाधकमेव प्रभाग्रहे तु तमोधीस्तु
. . . . . . प्रत्यक्षाभाव एव तमः,

एकत्र आलोकप्रत्यक्षेऽप्यन्यत्र तम(स) प्रत्यक्षत्वात् तमसश्चाक्षुषत्वानाप- . . तम इत्यपि न युक्तम्, गाढान्धकार इति प्रतीतेरपि भ्रमत्वापत्ते । तमो नील न तु नीलिमा इति प्रत्यय

**Colophon**

इति द्रव्यनिरूपणम् ॥

* * * *

(अनु)गतीकृत्य त (त्त)ज्जनकत्वाना यथाकथश्चिद्रूपेणानुगताना जन- कत्वाना वा अवच्छेदकत्वेन जातिकल्पने रूप ताया रूपान्यवृत्तिताद्दशजनकताया वा अवच्छेदकतया रूपावृत्तित्रयोविंशतिगुण- वृत्तिजाते

## No 4268 परामर्शवाद
## PARĀMARŚAVĀDAH

*Pages*, 63 Lines, 5 on a page

Begins on fol 71*a* of the MS described under No 3916

A discussion bearing on the nature of a ratiocination leading to an inference Author unknown

Incomplete

**Beginning**

परामर्श विनानुमितेरनुदयादनुमितिं प्राति परामर्शो हेतुरिति सि- द्धान्त । तत्र धूमपरामर्शसत्त्वे घटानुमित्यनुदयात्पर्वतोद्देश्यकवह्निविधेय- कानुमितिं प्रति पर्वतादिविशेष्यकवह्निव्याप्यधूमादिप्रकारकनिश्चयो हेतुरिति कार्यकारणभावो विशिष्य कल्पनीय । अथ वह्निव्याप्यालोकवान् पर्वत इति परामर्शादपि पर्वतो वह्निमान् इत्यनुमितेरुदयात्तत्र धूमपरामर्शहेतु- तायां व्यभिचार इति चेन्न, ताद्दशव्यभिचारवारणाय धूमपरामर्शजन्य- तावच्छेदककोटौ धूमलिङ्गकत्वनिवेशात् ।

**End**

एवश्चाप्यतीर(त)वह्न्याद्यनुमितिसामग्रीप्रतिबन्धकता परज्ञाननिवेशनप्रयुक्तमुपदर्शितगौरव मीमासकमते । नैयायिकमते तु तत्स्थलीयताद्दशानुमितिसामग्रीनियतोपद्

---

## No 4269 परामर्शवाद

## PARĀMARŚAVĀDAH

**Pages,** 10 Lines, 8 on a page

Begins on fol 48*a* of the MS described under No 4005

Incomplete

Same work as the above

---

## No 4270 प्रागभावविचार

## PRĀGABHĀVAVICĀRAH

**Pages,** 18 Lines, 7 on a page

Begins on fol 35*a* of the MS described under No 3918

A discussion on what is called the antecedent non-existence of things

**Beginning**

अथ प्रागभावे किं मानम्? न तावदध्यक्षम्, इहेदानीं घटप्रागभाव इति प्रत्यक्षासिद्धे । घटो भविष्यतीति प्रत्यक्षस्य च वर्तमानकालोत्तरकालोत्पत्तिकत्वावलम्बनत्वेनैवोपपत्ते प्रागभावासाधकत्वात् । न चाभावत्व विनाशिवृत्ति पदार्थविभाजकोपाधित्वात् भावत्व(व)दित्याद्यनुमानात्तत्सिद्धिरिति वाच्यम्, ताद्दशानुमानस्याप्रयोजकत्वात् ।

**End**

तदसत्, स्वसामानाधिकरण्यावच्छिन्नकालिकविशेषणतासम्बन्धेन दु खवदन्यत्वस्य ध्वसत्वे निवेशादेवेदानीन्तनदु खध्वसे व्यभिचारवारणसम्भवात् तद्वारणाय दुःखे चरमत्वनिवेशस्य वैफल्यादिति ॥

**Colophon**

इति प्रागभावविचार ॥

## No 4271. प्रागभावोज्जीवनम्

## PRÂGABHÂVÔJJÎVANAM

Pages, 27 Lines, 7 on a page

Begins on fol 44*a* of the MS described under No 3918

Complete

By Vajratanka

A work to uphold the theory that there is such a thing as an antecedent non-existence of things

**Beginning**

इदानीं चैत्रो नास्तीति प्रतीत्यैव प्रागभावस्समर्थयिष्यते—

प्रथम सामान्यतो नञुल्लेखाभावप्रतीतौ धर्मिण्यभावप्रकारतानियामकसम्बन्ध विचारयन् भूमिकामारचयति—नास्तीत्यादिना । नास्तीति नञुल्लिखिताभावप्रतीतौ दैशिकविशेषणतैवाभावस्य धर्मिविषयतानियामिका अन्यथा समवायावच्छिन्नघटत्वाभावस्य घटादौ कालिकसम्बन्धेन सत्त्वात् घटे घटत्व नास्तीति प्रतीत्यापत्तेश्च ।

**End**

एव कालिकसम्बन्धावच्छिन्नाभावस्य धर्मिणि दैशिकसम्बन्धेन भानोपगमे ज्ञानदशाया नास्तीत्यादिप्रतीतीनामदैशिकसम्बन्धावच्छिन्नाभावविषयकत्वस्योक्तत्वात्समवायावच्छिन्नघट . . . नवच्छेदक्षणेष्ववच्छेदकतया वृत्तिरिति न सुधिया सम्भाव्यमिति दिक् ॥

**Colophon**

मा(प्रा)गभावोज्जीवन वज्रटङ्कीय (समाप्तम्) ॥

## No. 4272 प्रामाण्यवाद

## PRĀMĀṆYAVĀDAH

Substance, palm-leaf Size, 18½ × 1¼ inches Pages, 78 Lines, 7 on a page Character, Telugu Condition, injured Appearance, old

Incomplete

A treatise on the criteria of truth as known to the Nyāya philosophy

By Agnihōtrabhaṭṭa

### Beginning

ननु मुनिपदेन तत्त्वार्थचिन्तनपरेण तत्प्रणीतविद्याया· प्रामाण्य प्रतिपाद्यते—

तदयुक्तम् , अष्टादशानामपि विद्याना तत्तन्मुनिप्रणीताना विरोधार्थतया प्रामाण्यायोगादिति चेन्न । तत्तद्विद्याना प्राधान्ये(न) प्रतिपाद्यांशे प्रामाण्यात् । तथा हि—न्यायविद्याया प्रमाणप्रमेयादितत्त्व तत्त प्रतिपाद्यम् , अस्त्येव तत्र प्रामाण्यम् , जीवेशभेदादिक तु स्थूलारुन्धतीन्यायेन सूक्ष्माद्वैतमतारोपयोग्यतया । प्रमाणचतुष्ट्वादिसङ्ख्याविशेषोपवर्णनमपि न्यायविशेषप्रदर्शनेन बुद्धिसौक्ष्म्यार्थमिति ।

### End

अस्तु पूर्वकोटिस्मृते सशयोपयोग भवता वा पूर्वमप्रामाण्यास्मरणम् । तथापि सशयो दुरुपपाद इत्याह किंचेति । तथा चेति । तस्य च दोषान्तरसापेक्षत्वात् न स्वातन्त्र्येण दोषत्वमिति भावः । यत्तु सशयानुरोधेनैव असससर्गाग्रहप्रयोज

## No 4273. बाधकोडपत्रम्.

## BĀDHAKRŌDAPATRAM

*Pages*, 14 *Lines*, 7 *on a page*

Begins on fol 27*a* of the MS described under No 4261

Incomplete

A controversial pamphlet on the logical fallacy called Bādha, which *means* 'contradiction'

By Śōkattūr-Vijayarāghavācārya

**Beginning**

नत्वा नन्दतनूज स्मृत्वा गुरुवर्यचरणपाथोजम् ।
लक्ष्मणि बाधस्यैतत् सभ्यजनाह्लादकारण क्रियते ॥

उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्ता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारताशालिबोधविषयतान्तःपातिनी या प्रकारता तदवच्छिन्नप्रतिबध्यतानिरूपिता सती स्वनिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयत्वानवच्छिन्ना . . तद्रूपावच्छिन्नत्व बाधसामान्यलक्षण भट्टाचार्यैरुक्तम् । . . . .

अथात्र लक्षणेऽसम्भव , वह्न्यभावव्याप्यवह्न्यभाववान् ह्रद इति ज्ञानस्य ह्रदो वह्न्यभाववानित्यनुमितिजनकतया बाधप्रतिबन्धकताया तादृशजनकतावच्छेदकविषयत्वानवच्छिन्नत्वाभावात् ।

**End**

निरुक्तोभयाभाववत्कालीनघटपक्षकस्थले तादृशावाशिष्टसाध्याभावाभाववद्वृत्तिमत्पक्षात्मकसत्प्रतिपक्षातिव्याप्तेः । नैवम्

---

No **4274** बाधरहस्यम्

BĀDHARAHASYAM

**Pages, 39** Lines, 9 on a page

Begins on fol 41*a* of the MS described under No 1388

This also deals with the nature of the fallacy known as Bādha different from the previous work

Author unknown

Complete

**Beginning**

अथ बाधबुद्धिप्रतिबध्यता वर्ण्यते—

तत्र तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्न विशेष्यताकतद्विशिष्टबुद्धेरनुदयात् पर्वतत्वावच्छिन्नविशेष्यताकसंयोगादि-संसर्गकवह्नित्वाद्यवच्छिन्नप्रकारताशाल्यलौकिकज्ञानत्वावच्छिन्न प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यताकदैशिकविशेषणतासंसर्गसंयोगादिसंसर्गावच्छिन्नवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कन्दितनिर्णयत्वेन प्रतिबन्धकत्व कल्प्यते ।

**End**

कायव्यूहस्थले च अन्यशरीरावच्छेदेन तदात्मनि बाधादिसत्त्वे अन्यशरीरावच्छेदेनापि तत्तद्विशिष्टबाधबुद्धिरुपेयेति तदुत्पादे प्रमाणविरहात्तादृशफलस्य प्रामाणिकत्वे तु अनायत्या चैत्रादिशरीरावच्छिन्नत्व बाधादौ विशिष्टबुद्धौ च विशेषण देयम् ॥

**Colophon**

इति बाधरहस्य सम्पूर्णम् ॥

## No 4275. मातरिश्वप्रत्यक्षवाद॰
## MĀTARIŚVAPRATYAKṢAVĀDAH

Pages, 17 Lines, 7 on a page

Begins on fol 20*b* of the MS described under No 3922.

A pamphlet on the direct perceptibility or otherwise of air, which is one of the five 'elements' of the Nyāya and Vaiśēṣika schools of philosophy

Complete

**Beginning**

वायुश्चैत्रज्ञानजन्य[चैत्र]प्रत्यक्षविषयो न वेति विप्रतिपत्ति , विधिकोटिर्मीमांसकानाम् , निषेधकोटिर्नैयायिकानाम् । चैत्रीयोपनीतभानात्मकप्रत्यक्षविषयत्वस्य वायोस्सत्त्वात् तदभावसाधने बाध इत्यत चैत्रीयज्ञानजन्यत्व प्रत्यक्षविशेषणम् । चैत्रीयोपनीतभानस्य चैत्रीयोपनायकज्ञानजन्यत्वाददोष ।

**End**

परमाण्वादिस्पर्शस्पार्शनवारणाय सामानाधिकरण्यसम्बन्धेन महत्त्वस्य हेतुतावा , तादात्म्यसम्बन्धेनानुद्भूतस्पर्शप्रतिबन्धकतायाश्च कल्पनाविरहात्तादृशकतिपयकार्यकारणभावस्याधिक्येऽपि भवन्मते अनन्तसन्निकर्षहेतुत्वाधिक्येन साम्याभावादिति परास्तम् ॥

**Colophon**

इति मातरिश्वप्रत्यक्षवादार्थ ॥

---

## No 4276. मुक्तिवाद..
## MUKTIVĀDAH

Substance, paper Size, $10\frac{1}{8} \times 4\frac{1}{8}$ inches Pages, 22 Lines, 11 on a page Character, Dēvanāgarī Condition, good Appearance, old

By Gadādhara on the meaning of **Mōkṣa** or final deliverence

Complete.

**Beginning**

प्रयोजनमुद्दिश्यैव पुमासस्तदुपाये प्रवर्तन्ते । अत' शास्त्रस्य प्रयोजन प्रथमत प्रदर्शयन्ति शास्त्रकृत । तत्र स्वत' प्रयोजन सुख तद्भोगो दु:खाभावश्च । तत्त्व चान्येच्छाधीनेच्छाविषयत्वम्, न तु प्रयोजनान्तरजनकत्वे सति प्रयोजनकत्वम् । स्वसाक्षात्काररूपभोग प्रति विषयतया जनके सुखे अव्याप्ते. ।

**End**

व्रीहिभिर्यजेत यवैर्वा इत्यादावपि व्रीह्यादौ यवसाहित्यबोधस्य व्युत्पत्तिसिद्धत्वादित्यन्यत्र विस्तर ॥

**Colophon**

इति श्रीगदाधरभट्टाचार्यविरचितोऽसौ मुक्तिवादः ॥

---

No **4277** योगरूढिवाद.

YŌGARŪDHIVADAH

Pages, 8 Lines, 7 on a page

Begins on fol 75*a* of the MS described under No 4214

Incomplete

A discussion relating to the etymological and current significations of words

**Beginning**

पद्मशक्ति(म)त्त्व पङ्कजपदवृत्ति न वा, पदवृत्तिप्रयोज्यपदार्थोपस्थितित्वमन्वयबोधजनकतावच्छेदक न वा ? इति विप्रतिपत्तिं सूचयितु मतभेदमुपन्यस्यति—पङ्कजेति । पङ्कजमानय जात( )पुत्र इत्यादिषु पङ्कपदजनिधातुस(क्त)प्रत्ययाना पङ्कजाद्यर्थेषु शक्तेः क्लृप्तत्वात् केवलरूढिवादिमत(ते)पूर्वपक्षम(क्षो)ऽपि न सम्भवतीति तदुपेक्ष्य केवलयोगवादिमतमनुवदति—तत्रेति ।

**End**

अत एव प्रकारान्तरेण परिहरति—गङ्गापदेति । न च गङ्गापदवैय-
र्थ्यम् । . . प्रतिपादकत्वरूपैकवाक्यत्वस्य
रक्षणार्थं लक्षणाभ्युपगमात् । एकवाक्यतानभ्युपगमे चान्य.

---

No. 4278. लक्षणावलि

LAKṢAṆĀVALIḤ

**Pages, 84 Lines, 5 on a page**

Begins on fol 44*a* of the MS described under No 4177

Complete

A treatise on Nyaya giving clear and comprehensive definitions of the seven categories, by Tippabhattavipaścit, son and pupil of Vādīndracittabhattavipaścit

**Beginning**

गिरिजामोदकं विघ्ननोदकं करमोदकम् ।
स्तौमीष्टदायकं लम्बकायकं गणनायकम् ॥
भक्तानुरक्तां नित्यापदूषणां मणिभूषणाम् ।
वाणीविलसितां वाणीमेणीदृशमहं भजे ॥
सर्वदा सर्वदात्रे सद्दर्शने परमात्मने ।
असत्तृष्णाय कृष्णाय विष्णवे जिष्णवे नमः ॥
सर्वतन्त्रनिपुणस्य वादिसच्चिट्टभाटि(भट्टि)विदुषस्सुतेन च ।
तिप्पयाख्यविदुषार्थसिद्धये कथ्यते कलितलक्षणावलिः ॥

लक्षणस्य तावत् पञ्च दोषाः—अव्याप्त्यतिव्याप्त्यसम्भवात्माश्रय-
व्यर्थविशेषणभेदात् । तत्र तावल्लक्ष्यतावच्छेदकाव्याप्य(पक)त्वे सति लक्ष्य-
तावच्छेदकसामानाधिकरण्यमव्याप्ति . . . . .

विषयत्वं पदार्थसमान्यलक्षणम् । विषयत्वमित्युक्ते शशविषाणमिति शब्द-

जन्यज्ञानविषये शशविषाणे अतिव्याप्ति तदर्थं साक्षात्कारपदम् । न च शशविषाणस्यासदर्थत्वेन ज्ञानाविषयत्वान्नातिप्रसङ्ग इति वाच्यम्, "अत्यन्तासत्यपि ह्यर्थे ज्ञान शब्द. करोति हि" इति वचनात् तत्रापि ज्ञानविषयत्वस्य सत्त्वात् ।

**End**

भावनावृत्तिगुणत्वसाक्षाद्व्याप्यजाति सस्कारत्वम् । एवमुक्तजात्यवान्तरजातिनिरुक्तिरप्यूह्या । अनित्यमात्रवृत्तिसत्तासाक्षाद्व्याप्यजाति कर्मत्वम् । एव तदवान्तरजातिनिरुक्तिरपि ज्ञेया ॥

मीमासाद्वयतर्कपन्नगगिरो व्याख्यानाशिक्षापटो-
र्वादीन्द्राभिधचिट्टिभट्टि(ट्ट)विदुषश्शिष्येण पुत्रेण च ।
तिप्पाभट्टविपश्चिता विरचिता ह्यानवद्यायिता
युक्त्या लक्षणराजिरप्रतिहता न्याय्या बुधाना मता ॥

---

## No 4279 विधिवाद.
## VIDHIVADAH

**Pages,** *56* Lines, *7* on a page

Begins on fol 61*a* of the MS described under No 3922

A discussion bearing upon what constitutes a commandment

Wants beginning and end

**Beginning:**

ज्ञानत्वेन कृतिसाध्यत्वप्रकारतानिरूपिताविशेष्यतावच्छेदकतास -न्धेन इच्छा प्रति तादृशसबन्धेन ज्ञानत्वेनैव वा हेतुताया कल्पयितु-मुचितत्वात् । चिकीर्षासामग्री यत्र प्रतिबन्धिका तत्र पाकत्वावच्छिन्न-विशेष्यकेष्टसाधनताज्ञानविशिष्टतादृशकृतिसाध्यताज्ञानत्वेन प्रतिबन्धकता-कल्पनापेक्षया कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानत्वेन प्रति-बन्धकत्वकल्पनेन लाघवात् । विशिष्टधर्मितावच्छेदककेष्टसाधनताज्ञानस्य चिकीर्षाहेतुत्वकल्पनमेवोचितमित्यपि न (सु)साधम् ।

**End**

एवञ्च कृतिसाध्यत्वे विधिशक्तिर्नोपेयते, अपि तु इष्टसाधनतायामेव। तस्याश्चाख्यातसामान्यशक्तिलभ्याया कृतौ विशेषणतयान्वय। कृतिवर्तमानत्वयोरिव एकपदार्थयोरपि कृतीष्टसाधनत्वयो परस्परान्वयो बाधकाभावात्। अष्ट(थ) पाकादिगोचरप्रवृत्तिं प्रति पाकादिसाधनत्वप्रकारकत्व(कृति)विशेष्यकेच्छात्वेन कृतिसाध्यत्वप्रकारकपाकादिविशे

---

## No 4280 विधिवाद

## VIDHIVĀDAH

Substance, palm-leaf Size, 15⅝ × 1⅜ inches Pages, 52 Lines, 8 on a page Character, Grantha Condition, injured Appearance, old

Wants beginning and end

Similar to the above

**Beginning**

श्येनेनेति। श्येनेनाभिचरन् यजेतेत्यत्र कथ विधिप्रवृत्ति ? हिंसाया बलवदनिष्टसाधनत्वादिति चेत् तत्र कृतिसाध्यत्वे सतीष्टसाधन(त्व)मेव योग्यतयान्वेति, न तु बलवदनिष्टा(न)नुबन्धित्वम् अयोग्यत्वात्, निन्दार्थवादेन प्रायश्चित्तोपदेशेन च हिंसाया बलवदनिष्टसाधनत्वावगमात्। अत एव विहितेऽपि श्येने विगानान्न तान्त्रिकप्रवृत्तिः, अभिचारस्य हिंसात्वेन न हिंस्यात्सर्वा भूतानीत्यनेन निषिद्धत्वादित्यर्थ।

**End.**

विधेरप्रामाण्यमपाकरोति—मुक्त इति। विघ्नेत्विति। प्रतिब(न्धकापादकेत्य)र्थ। उपसहरति तस्मादिति। जातेष्ट्यादिवद्यागस्यापि कृतिव्यधिकरणो व्यापारोऽस्त्वित्यर्थ। यस्य कर्मणो बहुपुरुषगतस्वर्गमपि फल श्रूयते

No 4281 विशिष्टद्वयाघटितत्वविशिष्टान्तराघटितत्वविचार .
VIŚISTADVAYĀGHATITATVAVIŚIṢTĀNTARĀGHATI-
TATVAVICĀRAH

Pages, 11 Lines, 8 on a page

Begins on fol 21*a* of the MS described under No 3919

A discussion bearing upon the necessity or otherwise of two of the specified conditions in the definition of the fallacy known as Satpratipaksa

Incomplete

**Beginning**

अथ विशिष्टद्वयाघटितत्वविशिष्टान्तराघटितत्वरूपविशेषणद्वयनिवेशापेक्षया लाघवाद्यद्रूपावच्छिन्नविषयकनिश्चयविशिष्टप्रथमयद्रूपावच्छिन्नाविषयकयद्रूपावच्छिन्नविषयकनिश्चयत्व (प्रकृतानुमिति)प्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वमेव निवेश्यते । ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववज्जलावच्छिन्नविषयकनिश्चयविशिष्टवह्न्यभाववज्जलावच्छिन्नाविषयकजलवद्ध्रदविषयकनिश्चयत्वस्य प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तितया तादृशविशिष्टद्वयघटितत्वस्यैव वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदे सत्त्वान्नातिव्याप्ति । वह्न्यभावत्वविशिष्टविषयकनिश्चयविशिष्टवह्न्यभावत्वाविशिष्टाविषयकवह्न्यभाववद्ध्रदविषयकनिश्चयाप्रसिद्ध्या नासम्भवावकाश ।

**End**

भट्टाचार्यमते धर्मविशिष्टधर्मवत्त्वमित्यनुगमकरणात् नोक्तदोष । धर्मे धर्मवैशिष्ट्यञ्च स्वावच्छिन्नप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तित्वस्वविशिष्टप्रतीतिविषयतावच्छेदकत्वउभयसम्बन्धेन । प्रतिबन्धकतावृत्तित्वञ्च स्वसमानाधिकरणेत्यादिभेदवत्त्वसम्बन्धेन । स्वाधिकरणत्वञ्च स्वावच्छिन्नविषयताशाल्यनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वसम्बन्धेन । भेदप्रतियोगितावच्छेदकत्वञ्च स्वाभाववत्त्वविशिष्टपक्षधर्मताज्ञानकालीनत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन । प्रतीतौ स्ववैशिष्ट्यञ्च स्वविशिष्टविषयतानिरूपक.

## No 4282 विशिष्टवैशिष्ट्यबोधविचार .

## VIŚISTAVAIŚISTYABŌDHAVICĀRAH

Pages, 22 Lines, 8 on a page

Begins on fol 1a of the MS described under No 3922

Two leaves are wanting in the beginning

Complete

A discussion relating to the power of attributes—as to whether they are or are not independently significant

**Beginning**

(प्र)तियोगित्वावच्छिन्नससर्गताकबुद्धित्वमेव तद्धर्मप्रकारकज्ञानजन्य तावच्छेदक वाच्यमिति लोहितवह्निमानित्यत्र लौहित्यविशिष्टवह्न्य(भाव)स्यापि तदवच्छिन्नप्रतियोगिताकत्वेन वह्निसयोगा . . . वच्छिन्नत्वात् लौहित्यावच्छिन्नप्रतियोगिताकत्वावच्छिन्नससर्गताकबुद्धित्वरूपस्य लौहित्यप्रकारकज्ञानजन्यतावच्छेदकाक्रान्ते(न्तते)ति न किञ्चिदनुपपन्नम् ।

**End**

भूतल घटवदित्यादिबुद्धे भूतलत्वाद्यवच्छिन्नानुयोगिकवैशिष्ट्याव-. गाहितया तत्रानुयोगितावच्छेदकप्रकारकज्ञानमुद्रयास्मन्मते भूतलत्वादिप्रकारकज्ञानस्यापेक्षितत्वाद्विशिष्टप्रतियोगिकवैशिष्ट्यबोधे साधारणतद्धर्मावच्छिन्नविषयताकबुद्धित्वस्य तत्प्रकारकज्ञानहेतुतावच्छेदकत्वसम्भवेऽपि विशेषणतावच्छेदकज्ञानहेतुतयोरैक्यादेकयुक्तेरुभयमतहेतुतेति विभावनीयम् ॥

**Colophon**

इति विशिष्टवैशिष्ट्यबोधविचारस्समाप्त. ॥

No 4283 विशिष्टान्तराघटितत्वविचार

VISISTĀNTARĀGHATITATVAVICĀRAH

Pages, 16 Lines, 8 on a page

Begins on fol 1a of the MS described under No 3913,

A discussion as to the necessity or otherwise of the expression Viśistāntarāghatita in the definition of the fallacy known as Satpratipakṣa

Complete

**Beginning**

नमामि शिरसा श्रीमच्छठारातियतीशितुः ।
शरणागतराज सच्चरणाम्भोरुहद्वयम् ॥

मेयत्वविशिष्टव्यभिचारादावतिप्रसङ्गवारणाय भट्टाचार्यैर्विशिष्टान्तराघटितत्व निविष्ट(वेशित)म् ।

अथैवमपि ह्रदो वह्निमानित्यादौ वह्न्यभावावच्छेदकत्वेन गृहीतजलवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयताक(मह्रा)विशिष्टवारणाय विशिष्टान्तराघटितत्वपदस्य विशिष्टद्वयाघटितत्वघटिततादृशार्थबोधकत्वेन वक्ष्यमाणतया मेयत्व धूमाभाववद्वृत्तिवह्नित्व च विशिष्टद्वयपदेनोपादायातिप्रसङ्गवारणसम्भवे निष्फलमेवेद विशिष्टान्तराघटितत्वम् ।

**End**

एकविशिष्टविषयतायामेव निवेशनीयतया तादृशविशिष्टविषयकप्रतीते निरुक्तविषयताशून्यत्वविरहादिति सर्व समञ्जसम् ॥

नत्वा लोकगुरु प्राप्य वेदान्तार्यशिरोमणिम् ।
शास्त्रोज्वलधिय मुख्य श्रीमता धीमता सदा ॥
दशाङ्घ्रिश्रीनिवासेन भारद्वाजकुलेन्दुना ।
लिखित पत्रमिद लक्ष्मीनारायणपुरीस्थिते ॥
तर्कवेदान्तवाक्तन्त्रबुद्धिकीर्तियुतस्य च ।
रङ्गाचार्यस्य पुत्रेण मस्विना मोक्षत पते (?) ॥

## No 4284 विशिष्टान्तराघटितत्वविचार

## VIŚISTĀNTARĀGHATITATVAVICĀRAH

Pages, 20 Lines, 8 on a page

Begins on fol 6*a* of the MS described under No. 4245

Incomplete

Same work as the above

**Beginning**

रघुवीरजगच्चक्षु प्रभायिततनुश्रिया ।
सीतयालोकितस्सोऽय विजयिष्येऽद्य वादिन ॥

स्वसजातीयविशिष्टान्तराघटितत्व मेयत्वविशिष्टन्य(भि)चारादावति-व्याप्तिवारणाय भट्टाचार्येण निवेशितम् । स्वसजातीयविशिष्टान्तराघटि-तत्व च स्ववृत्तिहेत्वाभासविभाजकरूपविशिष्ट यत् स्वाविषयकप्रतीति-विषयीभूत तदविषयकप्रतीतिविषयत्वम् ।

**End:**

उत्तरत्रापि सामान्यपदनिवेशे पर्वतो वह्निमान् धूमादित्यत्र पाषाण-मयत्वविशिष्टपर्वते अतिव्याप्ति , अत एकत्र व्यापकत्व निवेशनीयम् , उत्तरत्र केवल निवेशे पूर्वोक्तासम्भव , प्रथमतो निवेश्य उत्तरत्रानिवेशे भवच्छेदककोटिप्रविष्ट

---

## No 4285. विशेषवादार्थ.

## VIŚEṢAVĀDĀRTHAH

Pages, 30 Lines, 8 on a page

*Begins on fol 3a of the MS described under No* 3935

Copied by Vēnkatācārya of Śrīvatsagōtra

Complete

Herein a certain Krisnasudhī criticises unfavourably the definition of Viśēsa or particularity as given by Mahādēva, and gives his own definition, which he maintains to be the correct one

**Beginning**

रघुकुलजलधौ जात सम्भूतसन्तानमाश्रये कश्चित् ।
अधिकोन्नतेरपि यत विनतैरग्र्य फलोत्करो ग्राह्य ॥

महादेवप्रोक्ते सहृदयबुधाना सुरुचिरे
विशेषाणा लक्ष्मण्यभिदधुरसाङ्गत्यमिह ये ।
वचोभङ्गीं तेषा हृढघटितदोषा प्रकटयन्
सुधी कृष्णाभिख्यो रचयति मुद सर्वविदुषाम् ॥

स्वत एव व्यावृत्तत्वञ्च स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसमानजातीयभेदानुमित्यविषयत्वम् ।

**End**

अत्र च घटो गुणभिन्न इत्याद्यनुमितिमादाय स्वपदेन घट सगृह्य गुणादावतिप्रसङ्गपरिहाराय स्वविशेष्यकत्वपदफलितस्ववृत्तित्वोपादानमिति दिक् ॥

**Colophon**

विशेषवादस्सम्पूर्ण ॥

श्रीवत्सान्वयजातस्य वेङ्कटाचार्यस्य पुस्तकमिद स्वहस्तलिखित [मिद]म ॥

---

No **4286** विषयतावाद

VISAYATAVĀDAH

**Pages**, 33 Lines, 15 on a page

Begins on fol 20*b* of the MS described under No 3925

By Gadādhara

A discussion bearing on the nature and relation of the contents of perceptive knowledge

Complete

**Beginning**·

बुद्धिर्नाम कश्चिदात्मविशेषगुण, तद्व्यवस्थितिर्घटमहं जानामीत्याकारकापामरसाधारणानुभवबलादेव, सा च सविषयिका उक्तधर्मिग्राहकप्रतीत्या घटादिविषयकत्वेनैव तदवगाहनात्। घटादिनिष्ठ तद्विषयत्व च तत्प्रतियोगिकसम्बन्धविशेष, स च प्रतियोगित्वादिवत् स्वरूपादनतिरिक्त एव।

**End**

विरोधिज्ञानाप्रतिबन्धकत्वप्रसङ्गश्चेति प्रकारतादीनामेव तादृशप्रतिबन्धकभावावच्छेदकत्वादिति दिक्॥

**Colophon:**

इति श्रीगदाधरभट्टाचार्यकृतौ विषयतावादस्समाप्त॥

## No 4287. विषयतावाद
## VISAYATĀVĀDAH

Pages, 160 Lines, 7 on a page

Begins on fol 12*a* of the MS described under No 3922

Up to Śuddhavisavatāvādartha

Same work as the above

**Beginning**

विषयता च स्वरूपसम्बन्धविशेष ज्ञानादीना विषये, न त्वतिरिक्ता मानाभावादिति प्राञ्च। तदसत् तथाहि—

विषयताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपिताना घटभूतलादिवृत्तिविषयतानामभेदापत्त्या तादृशज्ञानानन्तरं घटप्रकारकज्ञानवानहमित्यादिप्रतीतिवत् भूतलप्रकारकज्ञानवानहमिति प्रत्ययप्रसङ्ग।

**End :**

न च सुरभि चन्दनमित्येतादृशचाक्षुषप्रतीते चन्दनलौकिकसन्नि-कर्षजन्यतया तदुत्तर सौरभ साक्षात्करोमि इत्यनुव्यवसायाविषयताविचार ॥

**Colophon**

इति शुद्धविषयतावादार्थस्समाप्तिमगमत् ॥ नलसंवत्सरे आश्विजमासे शुक्लपक्षे प्रतिपदि विषयतावादार्थस्समाप्तिमगमत् ॥

## No 4288 वृत्तिचन्द्रिका

## VṚTTICANDRIKĀ

Substance, paper Size, 12 × 4⅜ inches Pages, 42 Lines, 13 on a page Character, Dēvanāgarī Condition, injured Appearance, old

Deals with the various kinds of the significatory function of words by Ghāsīrāma, son of Ramabala pupil of Gauḍajātīya-mahāmahōpadhyāyaparamānanda

Complete

**Beginning**

या योगिभिर्योगसमाधिगम्या नाग हरन्ती विदुषा हृदिस्था ।
शक्त्यादिरूपत्रयमादधाना सा भारती मे हृदिगा सदास्तु ॥

ध्यात्वा गुरुपदाम्भोज स्मृत्वा तातपदद्वयम् ।
पूर्वयुक्त्यनुसारेण कुर्वेऽह वृत्तिचन्द्रिकाम् ॥

तत्राज्ञातवृत्तिकस्य शाब्दबोधानुदयात् न हि गुड इत्युक्ते मधुरत्वस्य प्रकारतासबन्धेनागन्धत्वात्तद्धर्मावच्छिन्नविषयकशाब्दत्वावच्छिन्न प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञान(नस्य) हेतुता वाच्या इत्यभियुक्तोक्त्या वृत्तिज्ञानस्य शाब्दबोधे कारणत्व कल्प्यम् । सा च शक्ति-

लक्षणाव्यञ्जनान्यतर(म)सबन्ध इति केचित् । केचित्तु पदजन्यपदार्थोप-
स्थितिहेतु पदस्य पदार्थेन सह सबन्धो वृत्ति । सा च त्रिधा ।

**End**

जहत्स्वार्था अजहत्स्वार्था चेति तन्मूलौ द्वौ ध्वने प्रभेदौ । तयो-
र्जहत्स्वार्थामूलो यथा—

कृत त्वयोन्नत कृत्यमार्जित चामल यश ।
यावज्जीव सखे तुभ्य दास्यामो विपुलाशिष ॥

इय कस्यचिदपकारिण प्रत्युक्ति । त्वया कृतेऽप्यपकारे परम-
खेदहेतौ मधुरमेव यो भाषे न (प)रुषम् , तस्मिन्नेवञ्जातीयके पापमाचर,
तव पापिष्ठत्व कथ शक्यते वक्तुम् ?

अपरामूलो यथा—

बधान प्रागेव द्रढिमरमणीय परिकर
किरीटे बालेन्दु नियमय पुन पन्नगगणै ।
न कुर्यास्त्व हेलामितरजनसाधारणतया
जगन्नाथस्याय सुरधुनिसमुद्धारसमय ॥

अत्र जगन्नाथस्येत्यनेन शक्य एवानेकविशिष्टत्वेन लक्ष्यते पापानां
पदान्तरेणानिर्वाच्यत्व व्यङ्ग्यमिति बोद्धव्यमिति सर्वं शिवम् ॥

**Colophon**

इति श्रीगौडज्ञातीयमहामहोपाध्यायपरमानन्दशिष्यरामबलात्मजघासी-
रामकृतवृत्तिचन्द्रिकाया लक्षणावृत्तिनिरूपण सम्पूर्णतामगमत् ॥

---

## No 4289 व्याप्तिकोडपत्रम्.

## VYĀPTIKRŌDAPATRAM

**Pages, 24** Lines, 11 on a page

Begins on fol 1*a* of the MS described under No 4236

This is a short pamphlet on the universality of the association of the middle term with the major

Incomplete

**Beginning :**

(ध)धिकरणतानिरूपिता यथाधेयता, तथाधेयताधिकरणनिरूपिताधि भवति । अत एव हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छि- न्नाधिकरणतानिरूपिताधे(य)त्वीयरूपसम्बन्धेन साध्याभावाधिकरणनिरूपित- वृत्तित्वाभाववत्त्व निवेश्य सत्तावान् जातेरित्यादावव्याप्तिवारण कृत मथुरा- नाथमहाचार्येण । एवञ्च वह्निमान् धूमादित्यादौ वह्न्यभावस्याधिकरणं धूमाधिकरणतापि भवति । तन्निरूपितवृत्तित्वमेव धूमे वर्तत इति वह्नि- मान् धूमादित्यादावव्याप्तिरिति चेन्न ।

**End :**

तथा च घटाभावान्यो घटाभावान्यत्वाभावीयप्रतियोगित्वावच्छिन्ना- भाववानिति बुद्ध्यनुदयेन घटाभावान्यत्वाभावीयप्रतियोगित्वावच्छिन्नाभाव- त्वस्य घटाभावान्यत्वरूपसाध्यवद्वृत्तितानवच्छेदकत्वेन साध्यवद्वृत्तिताव- च्छेदकीभूतानुयोगितानिरूपितप्रतियोगितान

---

No **4290.** व्युत्पत्तिवाद .

VYUTPATTIVĀDAH

Substance, paper Size, 11⅜ × 4⅜ inches Pages, 170 Lines, 14 on a page Character, Telugu Condition, good Appearance, new

. Complete

**An explanatory treatise on the meaning of the case-endings and other suffixes by Gadādhara**

**Beginning :**

शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गस्संसर्गमर्यादया भासते । स च क्वचिद्भेद, क्वचिच्च तदतिरिक्त एव आधाराधेयप्रतियोग्यनुयो- गिविषयविषयीभावादि । अभेदश्च प्रातिपदकार्थे स्वसमानविभक्ति- केन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भा-

सते । यथा—घटः नील, नीलघटमानयेत्यादौ घटादौ नीलादेः; प्रथु विरुद्धविभक्तिमत्पदाद्वे नीलस्य घट इत्यादौ ।

**End:**

सुखाद्यसाधनत्वस्य विध्यर्थताविरहेण प्रमेयत्वादेस्सुखत्वादिसाधारण्यं नोक्तरूपस्येत्यस्यैव विनिगमकत्वात् । न च तात्पर्याभावात् सुखाद्यसाधनत्वाबाधकत्वोपपत्तौ विध्यर्थत्वेऽपि क्षतिविरह इति वाच्यम्, तस्य विध्यर्थत्वे तत्तात्पर्येणाधुनिकानां न भुञ्जीतेत्यादिप्रयोगापत्ते. ॥

**Colophon·**

इति श्रीगदाधरभट्टाचार्यविरचितः व्युत्पत्तिवादस्समाप्तः॥

## No 4291. व्युत्पत्तिवाद

## VYUTPATTIVĀDAH

Substance, palm-leaf Size, 13¼ × 1¼ inches Page on a page Character, Grantha Condition, good Appearance, old

By Gadādhara

Complete

Same work as the above

## No 4292 व्युत्पत्तिवादः

## VYUTPATTIVĀDAH

Pages, 153 Lines, 10 on a page

Begins on fol. 135*a* of the MS described under No 4090

Breaks off in Tṛtīyāvibhaktivicāra

By Gadādhara

Same work as the above.

## No 4293. व्युत्पत्तिवादः.
## VYUTPATTIVĀDAH

**Pages, 126** Lines, 9 on a page

*Begins on fol.* 1*a* of the MS described under No 4250.

Upto the Tṛtīyāvibhakti

By Gadādhara

Same work as the above

---

## No 4294. व्युत्पत्तिवाद.
## VYUTPATTIVĀDAH

Substance, palm-leaf Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches Pages, 80 Lines, 8 on a page. Character, Grantha Condition, good Appearance, old

Wants beginning and end

Same work as the above

---

## No 4295. व्युत्पत्तिवाद.
## VYUTPATTIVĀDAH

Substance, palm-leaf Size, $18\frac{7}{8} \times 1\frac{3}{8}$ inches Pages, 47 Lines, 9 on a page Character, Grantha Condition, good Appearance, old.

Begins on fol 1*a* The other works herein are Śaktivāda 25*a*, Śaktivādavyākhyā 58*a*

Incomplete

• Same work as the above

---

## No 4296. व्युत्पत्तिवाद.
## VYUTPATTIVĀDAH

Substance, palm-leaf Size, $14 \times 1\frac{1}{4}$ inches Pages, 133 Lines, 7 on a page Character Telugu Condition, injured Appearance, old

Wants beginning and end

Same work as the above

## No 4297. व्युत्पत्तिवादः.

### VYUTPATTIVĀDAH

Pages, 14 Lines, 10 on a page

Begins on fol 84a of the MS described under No 4066

Incomplete

Contains a portion of Jagadīśīya in the end

Same work as the above

---

## No 4298. व्युत्पत्तिवादः.

### VYUTPATTIVĀDAH

Substance, palm-leaf Size, 17½ × 1⅝ inches Pages, 220 Lines, 8 on a page Character, Grantha. Condition, injured Appearance, old

Breaks off in Vidhivāda

Same work as the above

---

## No 4299. व्युत्पत्तिवादक्रोडपत्रम्.

### VYUTPATTIVĀDAKRŌDAPATRAM

Substance, palm-leaf Size, 17½ × 1½ inches Pages, 46 Lines, 8 on a page Character, Grantha Condition, good. Appearance, new

A controversial pamphlet on the Vyutpattivāda of Gadādhara Author unknown

**Beginning.**

ननु शाब्दे पदानुपस्थितस्य विषयतावारणाय स्वीकृतस्य विषयतया शाब्दे तया वृत्त्यधीनपदजन्योपस्थिते कारणत्वस्य संसर्गे व्यभिचारः; संसर्गता न विषयता; संसर्गतान्यविषयतासम्बन्धस्य कार्यतावच्छेदकत्वेऽपि स एव दोषः; संसर्गस्यापि प्रकारतया विशेष्यतया वा शाब्देऽभानादित्याशङ्कां निरसितुमाह—शाब्देति । एकपदार्थानुयोगिकः तत्पदा-

त्तिमदपरपदार्थप्रतियोगिकः संसर्गः शाब्दनिरूपितसांसर्गिकविषयत्वाभि-न्नविषयतावानेवेत्यर्थः ।

End:

शुक्लवह्न्यादाविति । ज्ञायमानवह्न्यादावित्यर्थः । तथाच तादृश-वह्निविषयताया न रक्तत्वप्रकारकत्वविशिष्टज्ञाननिरूपितत्वमिति भावः । साक्षात् विभक्त्यर्थमद्वारीकृत्य । तथा च [यथा] नीलत्वादिरूप(स्य)धात्वर्थे साक्षात् भेदेनान्वय परि(र्य)वसितार्थः । कश्चिद्ज्ञानमिति । अहं सुखी स्यामितीच्छायामित्यर्थः .

---

No 4300. व्युत्पत्तिवादव्याख्या--रामरुद्रभट्टीया.

VYUTPATTIVĀDAVYĀKHYĀ RAMARUDRA-BHATTĪYĀ

Substance, palm-leaf Size, 18⅜ × 1¼ inches Pages, 80 Lines, 8 on a page Character, Grantha Condition, pretty good. Appearance, new

A commentary on the Vyutpattivāda of Gadādhara by Rāmarudrabhaṭṭa

Incomplete

Beginning:

शाब्दबोधे चेति । चोऽवधारणार्थः । स च संसर्गमर्यादयेत्यन-न्तरं योजनीयः । संसर्गमर्यादा च संसर्गतैव, सांसर्गिकविषयतेति या-वत् । प्रकृत्या सुन्दर इत्यादाविवाभेदार्थिका तृतीया । अभेदस्य च मासधात्वर्थे विषयत्वेऽन्वयः । शाब्दबोध इति। सप्तम्या निरूपितत्वमर्थः । तस्यापि तत्रैवान्वयः । एकपदार्थ इत्यत्र सप्तम्या अनुयोगित्वमर्थः । अपरपदार्थस्येति षष्ठ्या प्रतियोगित्वमर्थः । तयोस्संसर्ग एवान्वयः ।

**End :**

तथा च नीलरूपविशिष्टस्य नीलपदार्थस्य भवत्यर्थे असाधारण-
धर्मे आधेयतासम्बन्धेन यथा(योग्यम)न्वय इति पर्यवसितार्थः । स च धर्मो
नीलत्वादिकमेवेति भाव । कश्चिद्ज्ञानमिति । अहं सुखी स्यामितीच्छा-
यामित्यर्थ .

---

## No 4301. व्युत्पत्तिवादव्याख्या.
## VYUTPATTIVĀDAVYĀKHYĀ

**Pages, 51** Lines, 7 on a page

Begins on fol 1*a* of the *MS* described under No 4247

Wants beginning and end

Author unknown

Similar to the above

**Beginning** ·

द्वितीयोपस्थाप्योद्देश्यत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शा-
ब्दबुद्धित्वावच्छिन्नं प्रति तृतीयान्तपदसमभिव्याहृतानुमित्यर्थकधातुपदनिरू-
पितवृत्तिज्ञानजन्योपस्थितेर्विशेष्य[ष्य]तासम्बन्धेन हेतुत्वमित्युक्तम् ।"

**End :**

वस्तुतस्तु पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नविधेय-
त्वादिकमेव पञ्चम्यर्थ इति नानुपपत्ति । शक्यानन्त्यस्य समभिव्याहार-
विशेषस्य नियामकतयानातिप्रसङ्गस्य च पर्वतादिविशेष्यतानिरूपितविधे-
यतामात्रस्य पञ्चम्यर्थत्ववादिना मतेऽपि तुल्यत्वादिति ध्येयम्.

---

## No 4302. शक्तिवाद .
## ŚAKTIVĀDAH.

**Pages, 68** **Lines, 9 on a page**

Begins on fol 25*a* of the MS described under No 4295

A work on the power of words to convey meanings

By Gadādharabhaṭṭācārya

Complete.

**Beginning :**

सङ्केतो लक्षणा चार्थे पदवृत्तिः । वृत्त्या पदप्रतिपाद्य पदार्थ इत्य-
भिधीयते । इदं पदमिममर्थं बोधयत्विति, अस्माच्छब्दादयमर्थो बोद्धव्य
इति वा इच्छा सङ्केतरूपा वृत्ति । तत्राधुनिकसङ्केत परिभाषा, तया
चार्थबोधक पद पारिभाषिकम् । यथा—शास्त्रकारादिसङ्केतितनदीवृद्ध्या-
दिपदम् । ईश्वरसङ्केतश्शक्ति , तयार्थबोधक पद वाचकम् । यथा—
गोत्वादिविशिष्टबोधक गवादिपदम् ।

**End**

तथा च गवादिपदस्य समवायेन गोत्वादिप्रकारकज्ञान एव शक्ते-
रुपगमात्ततो नाम्रान्ताना सबन्धान्तरेण तत्प्रकारकधी । तत्सबन्धेन
तत्प्रकारकज्ञाने शक्तिग्रहस्यैतादृशशाब्दबोधहेतुत्वमिति वाच्यानन्तर्भावस्य
समवायसाधारण्येन सबन्धान्तरभानप्रयोजनत्वासभवादिति कृत पल्लवि-
तेन ॥

**Colophon** ·

इति श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्तिविरचित शक्ति-
विचार ॥

---

No 4303. शक्तिवादव्याख्या.

ŚAKTIVĀDAVYĀKHYĀ

Pages, 41 Lines, 9 on a page

Begins on fol 58*a* of the MS described under No 4295

A commentary on the Śaktivāda of Gadādhara by Jayarāma-*śiṣya*.

Incomplete

**Beginning:**

वाग्मीसरोरुहोवैर्वदनसरोजासनोपरि स्थित्वा ।
भुवनमपूर्वमिव या प्रदर्शयति सा(स)रस्वती जयति ॥
शक्तिर्न शक्तिवादव्याख्यायामुत्कटासक्तौ ।
स्मरण जयरामगुरोश्चरणसरणस्य सन्निधीकरणम् ॥

शाब्दबोधकारणीभूतपदार्थोपस्थितिनिदानोद्बुद्धसंस्कारविषयवृत्तिनिरूप णमारभते—सङ्केत इत्यादिना । सङ्केत इति सङ्केतसामान्यमित्यर्थ. ।

**End.**

यादृशरूपाभ्यां कम्बुग्रीवात्वाद्यवच्छिन्नकम्बुग्रीवादिमत्त्वजातित्वाव- च्छिन्नभूतलत्वाभ्यां धर्मिणोर्घटभूतलयोस्तादृशैकधर्मप्रकारकज्ञानात् कम्बु- ग्रीवात्वाद्यवच्छिन्नकम्बुग्रीवादिमत्त्वादिप्रकारकज्ञानात् न त्वन्यरूपावच्छिन्न- कम्बुग्रीवादिप्रकारकज्ञानादित्येवकारव्यवच्छेद्यम् । एवमन्यत्रापि बोध्यम् । तादृशापरधर्मप्रकारेणैव जातित्वावच्छिन्नभूतलत्वेनैव । इत्यपीति । अनु- भव इति । प्राक्तनमत्रानुषज्यते.

---

No 4304. शक्तिवादार्थदीपिका.

ŚAKTIVĀDĀRTHADĪPIKĀ

**Pages**, 109 Lines, 7 on a page

Begins on fol 1*a* of the MS described under No 1491

A commentary on the Śaktivāda of Gadādhara by Kṛṣṇa-bhaṭṭa, son of Śrī Ranganātha and brother of Nārāyaṇa

The transcription was completed at 12-30 A.M on Monday the 31st of Āvaṇi, a new-moon day in the year Paritāpi

Complete

**Beginning:**

श्रीकृष्णचरणौ नत्वा शक्तिवादार्थदीपिकाम् ।
करोति सम्प्रदायेन कृष्णभट्टो मुदे सताम् ॥

सङ्केतोऽभिधारूपवृत्तिग्राहक इति मीमांसकमतम्, लक्षणा च शक्तिविशेष इति वैयाकरणमतम्, तदुभयं कटाक्षयन्नाह—सङ्केत इति। अत्र तीरं गङ्गापद(दार्थ)सबन्धि, न गङ्गापदार्थ इति ज्ञानेऽपि गङ्गायां घोष इत्यादितः शाब्दबोधानुदयात् सङ्केतमात्रेण ना(नोप)पत्तिरतो लक्षणा अतिरिक्तवृत्ति स्वीकार्येत्याशयवानाह—लक्षणा चेति। अर्थे इति स्वबुद्धावृत्त्यर्थम्। एवं च गौणीव्यञ्जनयो पृथग्वृत्तित्वमयुक्तम्, तयोर्लक्षणायामन्तर्भावसम्भवादिति बोध्यम्।

**End:**

पशुपदं लोमत्वशक्तमित्याकारकतया लोममुख्य[विशेष्य]विशेष्यकशाब्दबोधे बाधकाभावादिति ॥

**Colophon:**

इति श्रीरङ्गनाथसूरिसूनु[ना]नारायणा[नुजा]नुजकृष्णभट्टविरचितं शक्तिवादविवरण सम्पूर्णम् ॥

श्रीकृष्णचरणौ नत्वा शक्तिवादार्थ उद्धृत।
कृष्णभट्टेन तेनात्र प्रीयतां गिरिजापति ॥

## No 4305. शतकोटि.
## ŚATAKŌṬIḤ

Pages, 18 Lines, 8 on a page

Begins on fol 1a of the MS described under No 4261

This is a work which contains one hundred different objections relating to the significance of the expression Viśiṣṭāntaraghaṭitatva occurring in the Satpratipakṣalakṣaṇa as found in the Tattvacintāmaṇidīdhitiprakāśikā of Gadādhara by Mysore Rāmaśāstrin.

Breaks off in the 83rd Kōṭi.

**Beginning :**

पक्षतावच्छेदकविशिष्टपक्षविषयकत्वाव्यापकसाध्यतावच्छेदकविशिष्ट-साध्यविषयकत्वाव्यापकपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यता-वच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकयद्धर्मावच्छिन्नप्रतिबध्यता-निरूपितप्रतिबन्धकतावच्छेदिका सती तद्धर्मावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकता-वच्छेदिका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वमित्यस्यानुगम क्रि-यते—

प्रतिबध्यताविशिष्टधर्मवत्त्वमिति ।

* * * *

अथ ह्रदो वह्निमानित्यादौ वह्न्यभाववह्न्यभावव्याप्यव्याप्य उभ-यवद्ध्रदेऽतिव्याप्ति , तद्विषयताया निरुक्तप्रतिबन्धकत्वजनकतावच्छेदक-त्वउभयसत्त्वात् ।

**End**

न च जनकतामात्रघटिततादृशत्वस्य विशिष्टान्तरे निवेशे पूर्वोक्त-सत्प्रतिपक्षघटितसत्प्रतिपक्षे हेतुतावच्छेदकसम्बन्धावच्छिन्नत्ववृत्तित्वत्वाघटि-तांशमादायोक्तरीत्याव्याप्तिवारणाय सपूर्णसत्प्रतिपक्षलक्षणाक्रान्तत्वरूपता-दृशत्वस्य निवेशनीयतया अतिव्याप्तिर्दुर्वारैव । न च सपूर्णसत्प्रतिपक्ष-लक्षणाक्रान्तत्वनिवेशेऽपि सत्प्रतिपक्षघटितसत्प्रतिपक्षाव्याप्तिर्(दुर्वारा).

---

## No 4306. शतकोटिखण्डनम्.

## ŚATAKŌṬIKHAṆḌANAM

Substance, palm-leaf Size, 15½ × 1¼ inches Pages, 115 Lines, 6 on a page Character, Grantha. Condition, good Appearance, new.

A dissertation by Mysore Anantāḻvān criticising unfavourably the Śatakōṭi of Mysore Rāmaśāstrin

Complete.

**Beginning** :

यस्य श्रीनखकान्तिनाकसरितश्चूडायतेऽङ्घ्रिद्वय
सवानम्रसुरन्द्रवक्त्रमकुटामाला मरालायत ।
पश्यन्निर्जरयोषिदम्बकततिर्मीनप्रपञ्चायते
क्षोणीशाञ्जल्य. पयोजमुकुलन्त्यव्यात्स नारायणः ॥

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती पक्षतावच्छेदकविशिष्ट(पक्ष)ग्रहत्वाव्यापकसाध्यतावच्छेदकविशिष्ट(साध्य )ग्रहत्वाव्यापकपक्षसाध्यवैशिष्ट्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यादृशविशिष्टविषयता तादृशविशिष्टत्व सत्प्रतिपक्षत्वमित्युक्तम् ।

